आनन्दाश्रमसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः ४३

कौण्डभट्टविरचितवैयाकरभूषणसाराख्यव्याख्यासमेताः

भट्टोजिदीक्षितप्रणीत-

वैयाकरणसिद्धान्तकारिकाः ।

(कारिकाद्यचरणप्रतीकाकारादिवर्णानुक्रमादिभिः सनाथीकृताश्च ।)

एतत्पुस्तकम्

आनन्दाश्रमस्थपण्डितैः संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८२२

खिस्ताब्दाः १९०१

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः)

मूल्यं पादोनरूपकः (०१२) ।

आदर्शपुस्तकोल्लेखपत्रिका ।

अथास्य कौण्डभट्टविरचितवैयाकरणभूषणसाराख्यव्याख्यासमेतभट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिकाग्रन्थस्य पुस्तकानि यैः परहितैकपरतया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया प्रकाश्यन्ते—

(क.) इति संज्ञितम्—सटीकं किंचिच्त्रुटितम्, एतत्पुस्तकं पुण्यपत्तननिवासिनां वे० शा० रा० रा० "राघवाचार्यरामानुज" इत्येतेषाम् ।

(ख.) इति संज्ञितम्—सटीकं प्रायः पूर्णम्, एतत्पुस्तकं पुण्यपत्तननिवासिनां रा० रा० " नारायण बाबाजी जोशी " इत्येतेषाम् ।

(ग.) इति संज्ञितम्—सटीकं त्रुटितम्, एतत्पुस्तकमानन्दाश्रमसंस्कृतग्रन्थसंग्रहालयस्थम् ।

(घ.) इति संज्ञितम्—सटीकं प्रायः पूर्णम्, एतत्पुस्तकमानन्दाश्रमसंस्कृतग्रन्थसंग्रहालयस्थम् ।

(ङ.) इति संज्ञितम्—सटीकमन्ते किंचित्त्रुटितम्, एतत्पुस्तकमानन्दाश्रमसंस्कृतग्रन्थसंग्रहालयस्थम् ।

(च.) इति संज्ञितम्—सटीकं पूर्णम्, +

(छ.) इति संज्ञितम्—सटीकं पूर्णं कलिकातायां मुद्रितम्, एतत्पुस्तकं माहुलीक्षेत्रनिवासिनां वे० शा० रा० रा० " कृष्णशास्त्री गोडबोले " इत्येतेषाम् ।

(ज.) इति संज्ञितम्—सटीकं पूर्णम्, एतत्पुस्तकं सातारा(सप्तर्षि) ग्रामनिवासिनां वे० शा० रा० रा० "वासुदेव शास्त्री अभ्यंकर" इत्येतेषाम् ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

+ एतत्स्वामिनो नाम न ज्ञायते ।

अथ भट्टोजिदीक्षितप्रणीतवैयाकरणसिद्धान्तकारिका-विषयानुक्रमः ।

मङ्गलाचरणं ग्रन्थादौ प्रतिज्ञा च ।
पृ० १

धात्वर्थाख्यातसामान्यार्थनिर्णयः ।
पृ० २–१७

लकारविशेषार्थनिरूपणम् ।
पृ० १८–२०

सुबर्थनिर्णयः ।
पृ० २१–२६

नामार्थनिर्णयः ।
पृ० २७–३०

समासशक्तिनिर्णयः ।
पृ० ३०–३८

शक्तिनिर्णयः ।
पृ० ३८–४२

नञर्थनिर्णयः ।
पृ० ४२–४४

निपातद्योतकत्वनिर्णयः ।
पृ० ४४–४८

भावप्रत्ययार्थनिर्णयः ।
पृ० ४८–५०

देवताप्रत्ययार्थनिर्णयः ।
पृ० ५०–५२

अभेदैकत्वसंख्याया वृत्तौ माननिर्णयः ।
पृ० ५२–५३

उद्देश्यविधेययोः संख्याविवक्षानिर्णयः ।
पृ० ५३–५४

क्त्वाद्यर्थनिर्णयः ।
पृ० ५४–५५

स्फोटवादः ।
पृ० ५६–६४

इति भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिका-विषयानुक्रमः समाप्तः ।

ॐ तत्सद्ब्रह्मण नमः ।

भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिकाः ।

कौण्डभट्टविरचितवैयाकरणभूषणसाराख्य-व्याख्यासमेताः ।

(टीकाकारोपोद्घातः ।)

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥ १ ॥
अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥
*वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥ ३ ॥
नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम् ॥
श्रीकौण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम् ॥ ४ ॥
पाणिन्यादिमुनीन्प्रणम्य पितरं रंगोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुंभाववाग्देवताम् ॥
ढुण्ढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषिता-
न्सिद्धान्तानुपपत्तिभिः प्रकट्ये तेषां वचो दूषये ॥ ५ ॥

(इति टीकाकारोपोद्घातः ।)

प्रारिप्सितप्रतिबन्धकोपशमनाय कृतं श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं प्रतिजानीते—

(ग्रन्थादौ प्रतिज्ञा ।)

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥ १ ॥

उद्धृत इत्यत्रास्माभिरिति शेषः । भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिस्तु शब्दकौस्तुभोक्तार्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय । अन्यथा तन्मूलकस्यास्य ग्रन्थ-

* ग. पुस्तक एवैतौ श्लोकौ वर्तेते ।

(धात्वर्थाख्यातसामान्यार्थनिर्णयः)

स्याप्याधुनिकोत्प्रेक्षितसारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः। **तत्र निर्णीत** इत्युक्तिरितोऽप्यधिकजिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम् ॥ १ ॥

प्रतिज्ञातमाह—

(धात्वर्थाख्यातसामान्यार्थयोर्निर्णयः ।)

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ २ ॥

धातुरित्यत्र स्मृत इति वचनविपरिणामेनान्वयः । फलं विक्लित्त्यादि । व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया ।

उक्तं च वाक्यपदीये—

" यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते " इति ॥

न च साध्यत्वेनाभिधाने मानाभावः, पचति पाकः करोति कृतिरित्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात् । तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं * साध्यत्वम् । तद्रूपवत्त्वमसत्त्वभूतत्वम् । एतदेवाऽऽदाय " असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते " इति वाक्यपदीयमिति द्रष्टव्यम् । अयं च व्यापारः फूत्कारत्वाधःसंतापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः । पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात् । न च नानार्थकतापत्तिः, †तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात् । आख्याते क्रियैकत्वव्यवस्थाऽप्यवच्छेदकं ×बुद्धिविशेषैक्यमादायैव । उक्तं च वाक्यपदीये—

" गुणभूतैरवयवैः समूहः +क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते " इति ॥

धात्वर्थं निरूप्य तिङर्थमाह—**आश्रये त्विति** । फलाश्रये व्यापाराश्रये चेत्यर्थः । फलाश्रयः कर्म, व्यापाराश्रयः कर्ता । तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिरन्यलभ्यत्वात् । शक्यतावच्छेदकं चाऽऽश्रयत्वं तत्तच्छक्तिविशेषरूपमिति **सुबर्थनिर्णये** वक्ष्यते । नन्वनयोराख्यातार्थत्वे किं मानम् । प्रतीतेर्लक्षणयाऽऽक्षेपात्प्रथमान्तपदाद्वा संभवादिति चेत् । अत्रोच्यते—" लः कर्मणि च भावे चाकर्मकेभ्यः "

---

* कारकान्तराकाङ्क्षोत्थापकतावच्छेदकरूपधर्मवत्त्वमपि साध्यत्वम् । † यथा चैत्रत्वादीननुगमय्य तत्तदवच्छिन्नचैत्रादिषु तदादीनां शक्तिर्निर्धारिता तथाऽत्रापि कृत्यधिश्रयणत्वादीन्यनुगमय्य तत्तदवच्छिन्नेषु पचत्यादीनां निर्धार्यते । × समूहालम्बनात्मकबुद्धिगतैकत्वं तत्तत्क्रियास्वारोप्येत्यर्थः । + फूत्कारत्वादीनाम् ।

---

१ च. °वच्छे° ।

[पा० सू० ३-४-६९] इति सूत्रमेव मानम् । अत्र हि चकारात्— " कर्तरि कृत् " [पा० सू० ३-४-६७] इतिसूत्रोक्तं कर्तरीत्यनुकृष्यते । बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते । नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकशक्तिमादाय शसादिविधानवत् । न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे, तथा च कर्तृत्वं कृतिः कर्मत्वं च फलमेवार्थोऽस्त्विति शङ्क्यम् । फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनायोगात् । अथ *दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत्तर्हि कृतामपि कर्तृकर्मादिवाचित्वं न सिध्येत् । " कर्तरि कृत् " [पा० सू० ३-४-६७] इति च लः कर्मणीत्यनेन तुल्ययोगक्षेमम् । अपि च **मीमांसकानां** कृतामिवाऽऽख्यातानामपि कर्तृवाचित्वमस्तु भावनाया एवाऽऽक्षेपेण कृदादिवत्प्रतीतिसंभवे वाच्यत्वं माऽस्तु । तथा सति प्राधान्यं तस्या न स्यादिति चेन्न । घटमानयेत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः । पचतीत्यादौ भावनाया विवरणदर्शनाद्वाच्यत्वमिति चेत् । पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशेषात् । न च कर्तुर्विवरणं तात्पर्यार्थविवरणं पाकं करोतीत्यशब्दार्थकर्मत्वविवरणवदितरेतरद्वंद्वे हि समुच्चयांशविवरणवद्वा न तदर्थनिर्णायकमिति वाच्यम् । भावनायामपि तुल्यत्वात् । किं च पचति देवदत्त इत्यत्राभेदान्वयदर्शनात्तदनुरोधेन कर्तुर्वाच्यत्वमावश्यकं पक्ता देवदत्त इतिवत् । न ×चाभेदबोधे समानविभक्तिकत्वं नियामकं तच्चात्र नास्तीति वाच्यम् । +सोमेन यजेत स्तोकं पचति राजपुरुष इत्यादावप्यभेदबोधानापत्तेः । न च लक्षणया कर्तुरुक्तत्वात्सामानाधिकरण्यं पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वापत्तेः । ‡एवं वैश्वदेवीत्यादितद्धितानामपि । " अनेकमन्यपदार्थे " [पा० सू० २-२-२४] " साऽस्य देवता " [पा० सू० ४-२-२४] इत्यनुशासनेनापि पिङ्गे अक्षिणी यस्या विश्वे देवा देवता अस्या इति विग्रहदर्शनात्, प्रधानषष्ठ्यर्थ एवानुशासनलाभात् । तथा च— " अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति " [तै० सं० का० १ प्र० २अ० १०] इति वाक्ये द्रव्यानुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्य एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः । द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरिति

---

* मीमांसकरीत्येत्यर्थः । पचतीत्यस्य पाकं करोतीति विवरणदर्शनात् । फलं पचेरर्थः । तिङः करोतिरिति हि तद्रीतिः । × नीलो घट इत्यादौ । + इह मत्वर्थलक्षणायां सोमवता यागेन स्तोकाभिन्नं पचनमिति । नन्वत्र नास्ति पदद्वयमत आह—राजेति । † अभेदान्वययोग्यत्वम् । ‡ पिङ्गाक्ष्यादिवत् ।

---

१ क. ख. च. °द्वे साहित्यांश° ।

प्रपञ्चितं विस्तरेण वैयाकरणभूषणे । तिङ इति । बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम् । पदार्थं निरूप्य वाक्यार्थं निरूपयति—फल इत्यादि । विक्लित्त्यादिफलं प्रति तिङर्थः कर्तृकर्मसंख्याकालाः । तत्र कर्तृकर्मणी व्यापारफलयोर्विशेषणे । संख्या कर्तृप्रत्यये कर्तरि । कर्मप्रत्यये कर्मणि । समानप्रत्ययोपात्तत्वात् । तथाचाऽऽख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः । नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो वाच्यः, सोऽपि चन्द्र इव मुखं दृश्यते देवदत्तो भुक्त्वा व्रजतीत्यादौ चन्द्रक्त्वार्थयोराख्यातार्थान्वयादितराविशेषणत्वघटित इत्यतिगौरवम् । इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे । कालस्तु व्यापारे विशेषणम् । तथा हि—" वर्तमाने लट् " [पा०सू०३-२-१२३] इत्यत्राधिकाराद्धातोरिति लब्धम् । तच्च धात्वर्थं वदत्प्राधान्याद्व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः । न च संख्यावत्कर्तृकर्मणोरेवान्वयः शङ्क्यः । अतीतभावनाके कर्तरि पचतीत्यापत्तेः । अपाक्षीदित्यनापत्तेश्च । पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च । नापि फले तदन्वयः, फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः । पक्ष्यतीत्यापत्तेश्चेत्यवधेयम् । न चाऽऽमवातजडीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वादुत्तिष्ठतीतिप्रयोगापत्तिः । परयत्नस्याज्ञानादप्रयोगात् । किंचिच्चेष्टादिनाऽवगतौ चायमुत्तिष्ठतिशक्त्यभावात्फलं तु न जायत इति लोकप्रतीतेरिष्टत्वात् । एवं च *तिङर्थो विशेषणमेव । +भावनैव प्रधानम् । यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टम्, तथाऽपि " भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि " इतिनिरुक्तभूर्वादिसूत्रस्थक्रियाप्राधान्यबोधकभाष्याभ्यां धात्वर्थभावनाप्राधान्यमध्यवसीयते । अपि चाऽऽख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात्प्रथमान्तस्य प्राधान्यापत्तिः । तथा च पश्य मृगो धावतीत्यत्र भाष्यसिद्धैकवाक्यता न स्यात् । प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः । न चैवमप्रथमासामानाधिकरण्याच्छतृप्रसङ्गः । *एवमपि द्वितीयाया दुर्वारत्वेन पश्य मृग इति वाक्यस्यैवासंभवापत्तेः । न च पश्येत्यत्र तमिति कर्माध्याहार्यं वाक्यभेदप्रसङ्गात् । उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वात् । अध्याहारेऽनन्वयापत्तेश्च । एवं च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोद्घोषो नाऽऽदरणीयः । =किं तु आख्यातार्थकर्तृप्रकारकबोधे

---

* कालकारकसंख्यारूपः । + किं तर्हि प्रधानमत आह—भावनेति । † पचतिक्रिया भवतिक्रियायाः कर्त्र्यो भवन्तीति हि तत्रोक्तम् । * मृगपदोत्तरं द्वितीयापादने । = इदमेव भाष्यानुगुणम् ।

(धात्वर्थाख्यातसामान्यार्थनिर्णयः)

धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः । भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद्धात्वर्थभावनोपस्थितिरपि हेतुः । पश्य मृगो धावति पचति भवतीत्याद्यनुरोधादिति दिक् । इत्थं च पचतीत्यत्रैकाश्रयिका पाकानुकूला भावना, पच्यत इत्यत्रैकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः । देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः । घटो नश्यतीत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः । स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम् * । अत एव तस्यां सत्यां नश्यति तदत्यये नष्टस्तद्भावित्वे नङ्क्ष्यतीति प्रयोगः । देवदत्तो जानातीच्छतीत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्तमानो व्यापार इति बोधः । स चान्तर्त आश्रयतैवेति रीत्योह्यम् ॥ २ ॥

नन्वाख्यातस्य कर्तृकर्मशक्तत्वे पचतीत्यत्रोभयबोधापत्तिः कर्तृमात्रबोधवत्कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह—

फलव्यापारयोस्तत्र फले तङ्यक्विचणादयः ।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥ ३ ॥

तङादयः फल आश्रयान्वयं द्योतयन्ति । फलान्वयाश्रयस्य कर्मत्वात्तद्द्योतकाः कर्मद्योतकाः, व्यापाराश्रयस्य कर्तृत्वात्तद्द्योतकाः कर्तृद्योतका इति समुदायार्थः । **द्योतयन्ति** तात्पर्यं ग्राहयन्ति ॥ ३ ॥

नन्वेवम्—" क्रमादमुं नारद इत्यबोधि सः " [शि० व० स० १] इत्यादौ पच्यत ओदनः स्वयमेवेत्यादौ च व्यभिचारः । कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे सति " कर्मवत्कर्मणा तुल्यक्रियः " [पा० सू० ३-१-८७] इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि कर्तुरेव बोधाद्व्यापार एवाऽऽश्रयान्वयाच्च । अबोधीत्यत्रापि बुध्यतेः कर्तरि लुङ्, च्लिः, तस्य " दीपजन " [पा० सू० ३-१-६१] इति चिण् । " चिणो लुक् " [पा० सू० ६-४-१०४] इति तस्य लुगिति साधनादित्याशङ्कायामाह—

उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात् ॥
तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥ ४ ॥

कर्मकर्तृविषयादौ पच्यत ओदनः स्वयमेवेत्यादौ । अत्र ह्येकौदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः । क्रमादित्यादिपदग्राह्यम् । अत्र सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापार इति बोधः ।

---

* एतद्रूप एव व्यापारः । + व्यापार आत्ममनःसंयोगरूपः ।

---

१ घ. ङ. च. °लाश्र° ।

यथोचितमिति । सकर्मकधातुसमभिव्याहृत*भावसाधारणविधिविधेयचिण्यगादिकर्मद्योतकमिति भावः ॥ ४ ॥

एवं सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थं निरूप्य **फलव्यापारयोरिति** प्रतिज्ञातं धातोर्व्यापारवाचित्वं लडाद्यन्ते भावनाया अवाच्यत्वं वदतः **प्राभाकरादीन्प्रति** व्यवस्थापयति—

व्यापारो भावना सैवोत्पादना सैव च क्रिया ॥
कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ॥ ५ ॥

पचति पाकमुत्पादयति पाकानुकूला भावना तादृश्युत्पादनेति विवरणाद्विधीयमाणस्यापि तद्वाचकतेति भावः । व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम् । अत एव पचतीत्यत्राधःसंतापनत्वफूत्कारत्वचुल्ह्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः । न चैवमेषां शक्यतावच्छेदकत्वे =गौरवापत्त्या कृतित्वमेव +तदवच्छेदकं वाच्यम् । रथो गच्छति जानातीत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी । शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद्गुरुणि संभवात् । तयोर्वैषम्ये बीजाभावात् । न च पचति पाकं करोतीति †यत्नार्थकरोतिना विवरणाद्यत्न एवाऽऽख्यातार्थ इति वाच्यम् । रथो गमनं करोति बीजादिनाऽङ्कुरः कृत इति दर्शनात्कृञो यत्नार्थकताया असिद्धेरिति× । किं च भावनाया +अवाच्यत्वे घटं भावयतीत्यत्रैव घटो भवतीत्यत्रापि द्वितीया* स्यात् । न चात्र घटस्य ·।· कर्तृत्वेन तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम् । अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात् । कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात् । धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात् । अपि च भावनाया अवाच्यत्वे धातूनां सकर्मकत्वाकर्मकत्वविभाग उच्छिन्नः स्यात् । स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया वाच्यत्वमन्तरेणासंभवि । अन्यतमत्वं तत्त्वमिति चेन्न । एकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वदर्शनात् । तदेतदभिसंधायाऽऽह—**कृञ इति** । अयं भावः—व्यापारावाच्यत्वपक्षे फलमात्रमर्थ इति फलितम् । तथा च करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं

---

* भावपदसमभिव्याहृतकर्मपदघटित इत्यर्थः । = धातुवाच्यतावच्छेदकत्वेन गौरवात् । + धात्वर्थतावच्छेदकं लाघवादिति भावः । † एवं विवरणेन कृतित्वं तदवच्छेदकमस्त्विति भावः । × पूर्वविवरणस्य भावनायामेव तात्पर्यम् । + उत्पत्त्यादिरूपफलस्य वाच्यत्व इति शेषः । * उत्पत्तिरूपफलाश्रयस्य सत्त्वात् । ·।· अचेतने कृतिराहित्येन गौणेनेत्यर्थः ।

---

१ च. °यापत्तिः । न । २ च. °त्वव्यवहार उ° ।

वाच्यमभ्युपेयं, तथा च "यती प्रयत्ने" इतिवत्फलस्थानीययत्नवाचकत्वाविशेषाद्-कर्मकतापत्ति*रुक्तरीत्या दुर्वारेति । तथा च **न हि यत्न** इत्यत्र फलस्थानीयत्वेनेति शेषः । **कृञ** इति धातुमात्रोपलक्षणं, सर्वेषामप्यकर्मकता सकर्मकता वा स्यादिति भावः । अथ वा **व्यापारो भावनेत्यर्धेन** व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत्साधयन्नैयायिकाभ्युपगतं जानातिकृञादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति—**कृञ इति** । अयं भावः—फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्, तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्वोच्छेदापत्तिः । न च कृञादौ सकर्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तम् । व्यवहारस्य भाक्त-त्वेऽपि कर्मणि लकारासंभवात् । न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादि कार्यं शक्यं कर्तुम् । एवं च **न हि यत्न** इत्यत्र यत्नमात्रमित्यर्थः ॥ ५ ॥

अत एवाऽऽह—

किं तूत्पादनमेवातः कर्मवत्स्याद्यगाद्यपि ।
कर्मकर्तर्यन्यथा तु न भवेत्तद्दृशेरिव ॥ ६ ॥

उत्पादनमुत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः । फलस्य वाच्यत्वे युक्त्य-न्तरमाह—**अत इत्यादि** । यतः कृञो यत्नमात्रमर्थो नेष्यतेऽतः **कर्मवत्स्यादिति** पदेन " कर्मवत्कर्मणा तुल्यक्रियः " [पा० सू० ३-१-८७] इति सूत्रं लक्ष्यते । अयमर्थः—यत एतस्योत्पादनार्थकताऽतः पच्यत ओदनः स्वयमेवेतिवत्क्रियते घटः स्वयमेवेति यगादयोऽप्युपपद्यन्ते । **अन्यथा** यत्नस्य कर्मनिष्ठत्वाभावात्तन्न स्यात्, दृशिवत् । यथा दृश्यते घटः स्वयमेवेति न, दर्शनस्य +घटावृत्तित्वात्तथा यत्नस्या-पीति तथाप्रयोगानापत्तेरिति ॥ ६ ॥

नन्वेवं कृञादेरिव जानात्यादेरपि विषयावच्छिन्नावरणभङ्गादिफलवाचित्वमाव-श्यकम् । अन्यथा सकर्मकतानापत्तेः । तथा च ज्ञायते घटः स्वयमेवेति किं न स्यात् । एवं ग्रामो गम्यते स्वयमेवेत्याद्यपीत्याशङ्कां मनसि कृत्वाऽऽह—

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।
न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ॥ ७ ॥

ईप्सितं कर्म त्रिविधम्—**निर्वर्त्यं विकार्यं प्राप्यं** च । तत्राऽऽद्ययोः **कर्मवद्भावो** नान्त्ये । प्राप्यत्वं च क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते । न ह्ययं घटः केनचिद्दृष्टो ग्रामोऽयं केनचिद्गत इति शक्यं कर्मदर्शनेनावगन्तुम् । घटं करोतीति निर्वर्त्ये सोमं सुनोतीति विकार्ये च तज्ज्ञातुं शक्यमिति न तत्प्राप्यम् । तथा च घटादेर्दृश्यादौ प्राप्यकर्मत्वान्नोक्तातिप्रसङ्ग इति भावः । धातूनां फलावाच-

* सकर्मकभिन्नमकर्मकत्वम् । + घटमात्रवृत्तित्वाभावात्कर्मस्थक्रियत्वाभावात् ।

कत्वे त्यजिगम्योः पर्यायतापत्तिः, *क्रियावाचकत्वाविशेषात् । फलस्योपलक्षणत्वेऽ-
प्येककक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि
वदन्ति। तस्मादावश्यकं सकर्मकाणां फलवाचकत्वम्। अकर्मणां तु *तन्निर्विवादमेव ।
"भू सत्तायाम्" [भ्वा० ग०] इत्यनुशासनाच्च । अत एव +ध्यर्थः पचिरिति भाष्य-
प्रयोगः संगच्छत इति दिक् ॥ ७ ॥

एवं सिध्यतु फलव्यापारयोर्वाच्यत्वम्। किं त्वाख्यातवाच्यैव सा भावना । न
धातोः प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थतायाः "प्रकृतिप्रत्यययोः प्रत्ययार्थः
प्रधानम्" इति न्यायविरुद्धत्वात्। तदागमे हि दृश्यत इति न्यायविरुद्धत्वाच्च। ÷एवं च
स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वमाख्यातार्थव्यापाराश्रयत्वं
च कर्तृत्वं वाच्यमित्यादि वदन्तं **मीमांसकंमन्यं** प्रत्याह—

तस्मात्करोतिर्धातोः स्याद्व्याख्यानं न त्वसौ तिङम्।
पक्ववान्कृतवान्पाकं किं कृतं पक्वमित्यपि ॥ ८ ॥

तस्मादभिप्रायस्थहेतोः। स चेत्थं फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवानिति प्रती†-
त्यापत्तिः । संयोगाश्रयत्वात्। फलानुत्पाददशायां व्यापारसत्त्वे पाको भवतीत्यनापत्तिः।
व्यापारविगमे फलसत्त्वे पाको विद्यत इत्यापत्तिश्च । यत्तु भावप्रत्ययस्य घञादेरनुकूल-
व्यापारवाचकत्वान्नानुपपत्तिरिति, तन्न कर्त्राख्यातवत् (("कर्तरि कृत्" [पा०
सू० ३-४-६७] इत्यत एव =तद्विधानलाभे भावे विधायकानुशासनवैयर्थ्यापत्तेस्त-
द्विरोधापत्तेश्च । अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत्तर्हि धातुत एव सकल-
व्यापारलाभसंभवेनाऽऽख्यातस्य पृथक्शक्तिकल्पने गौरवमिति । पचतीत्यस्य पाकं
करोतीति विवरणात्मा **करोतिर्धातोरेव** व्याख्यानं विवरणम्। अतस्तदपि नाऽऽख्या-
तार्थत्वे साधकमिति भावः। मीमांसकोक्तं बाधकमुद्धरंस्तन्मतं दूषयति—**न त्वित्या-
दिना। नासौ तिङां** व्याख्यानं **पक्ववानित्यादावनन्वयापत्तेरित्यर्थः**। अयं भावः—
"प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थप्राधान्यम्" इत्यस्य हि विशेष्यतया
प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फलि-
तस्तथा च पक्ववानित्यत्र पाकः कर्मकारकं क्तवतुप्रत्ययार्थः कर्तृकारकम्। तयोश्चारुणा-

---

* एकव्यापार एव न विभागसंयोगौ फलम् । × अशक्यत्वे सति शक्यव्यावर्तकमुपलक्षणम्।
* स्वार्थसमानाधिकरणफलवाचकत्वात्। ÷ फलद्वयार्थक इत्यर्थः। ÷ भावनायास्तिङर्थत्वे। † फलस्य
तत्र सत्त्वात्। सिद्धान्ते व्यापारस्यापि वाचकत्वेनैवं प्रयोगो न जायते। * इदमिष्टं न स्यादिति
भावः। ((अत्र यथा व्यापारार्थत्वं तथा घञः कर्तरि विधानेन भावः सिद्धः । = तदीयसि-
द्धान्ते ।

---

१ क. ङ. ज. °यार्थस्य प्राधान्यम्।

(धात्वर्थाख्यातसामान्यार्थनिर्णयः)

धिकरणरीत्या वक्ष्यमाणास्म*द्रीत्या चान्वयासंभव इति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्राधान्यबोधक उक्तकार्यकारणभावः । न च—

" संबन्धमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः ।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते " ॥

इति भट्टपादोक्तरीत्या संबन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहात् । अन्वयप्रयोजकरूपवत्त्वस्य तत्त्वात् । क्रियात्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते, तदेतदाविष्कर्तुं विवरणेन धात्वर्थस्योक्तवत्त्वर्थयोः कर्मत्वकर्तृत्वे दर्शयति—**कृतवान्पाकमिति** । वस्तुतः "प्रत्ययार्थः प्रधानम्" इत्यस्य यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थः स प्रधानमेवेति वा नार्थः । अजाऽश्वा छागीत्यादौ स्त्रीप्रत्ययार्थस्त्रीत्वस्यैव प्राधान्यापत्तेश्छाग्यादेरनापत्तेश्च+। किं तूत्सर्गोऽयम्† । विशेष्यत्वादिना बोधस्तु तथाव्युत्पत्त्यनुरोधात् । अत एव= नैयायिकानां प्रथमान्तविशेष्यक एव बोधः । लक्षणायामालंकारिकाणां शक्यतावच्छेदकप्रकारक एव बोधो न नैयायिकादीनाम् । घटः कर्मत्वमानयनं कृतिरित्यादौ विपर्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो न तद्व्युत्पत्तिविरहितानामन्येषां तन्निराकाङ्क्षमेवेति संगच्छते । अत एव " प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् " [पा० सू० १-२-५६] इत्याह भगवान्पाणिनिः । प्रधानं प्रत्ययार्थ इति वचनं न कार्यमर्थस्य तथाबोधस्यान्यप्रमाणत्वाद्व्युत्पत्त्यनुसारित्वादिति हि तदर्थः । एवं सत्यपि नियामकापेक्षणे च " भावप्रधानमाख्यातम् " इति वचनमेव गृह्यतामिति सुधीभिरूह्यम् । "तदागमे हि" इति न्यायो विवरणं चातिव्याप्तमित्याह—**किं कृतं पक्वमिति** । कृत्वा विवरणं प्रतीतिश्च पक्वमित्यत्रापीति तत्रापि भावना वाच्या स्यादिति भावः । नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह—**अपीति** । तथा चोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो ((धातुरेव वाचक इति भावः । भवद्रीत्या प्रत्ययार्थत्वात्प्राधान्यापत्तिश्चेति† द्रष्टव्यम् ॥ ८ ॥

(×व्यापारस्य धात्वर्थत्वे) साधकान्तरमाह—

किं कार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि ।
किं च क्रियावाचकतां विना धातुत्वमेव न ॥ ९ ॥

कार्यमित्यत्र " ऋहलोर्ण्यत् " [पा० सू० ३-१-१२४] इति कर्मणि ण्यत् । पचनीयमित्यादौ चानीयर् । आदिना ज्योतिष्टोमयाजीत्यादौ णिनिः करण उपपदे

---

* सुबर्थनिर्णय इत्यादिः । + तस्याः प्राधान्यस्यानुभूयमानस्यानुपपत्तेः । † न्यायः । =तथाव्युत्पत्त्यनुरोधादेव । ((तथा च धातुत्वमेवैकं शक्तावच्छेदकमिति लाघवम् । † कृत्स्वस्मन्मतेनेति भावः । × धनुश्चिह्नान्तर्गतं छ. पुस्तक एव ।

---

१ छ. °नं नेत्यनुवर्त्य न ।

कर्तरि। एते च क्रियायोगमन्तरेणासन्तस्तद्वाच्यतां बोधयन्ति। विना क्रियां कारकत्वासंभवेन तद्वाचकप्रत्ययस्याप्यसंभवात्। न च गम्यमानक्रियामादाय कारकयोग इति **भाट्टरी**तिर्युक्ता। आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः। अथ लिङ्गसंख्यान्वयानुरोधात्कर्तुर्वाच्यत्वमावश्यकमिति तेनाऽऽक्षेपाद्भावनाप्रत्ययोऽपि स्यादिति मतं तर्हि संख्यान्वयोपपत्तेराख्यातेऽपि कर्ता[1] वाच्यः स्यात्। पक्ववानित्यादिकालकारकान्वयानुरोधाद्भावनाया अपि[2] वाच्यत्वस्याऽऽवश्यकत्वाच्चेति भावः। आपिना हेत्वन्तरसमुच्चयः। तथाहि—नखैर्भिन्नो नखभिन्नः, हरिणा त्रातो हरित्रात इत्यादौ "कर्तृकरणे कृता बहुलम्" [पा० सू० २-१-३२] इति समासो न स्यात्। पुरुषो राज्ञो भार्या देवदत्तस्येत्यादिवदसामर्थ्यात्। न चाध्याहृतक्रियाद्वारा सामर्थ्यं वाच्यम्, दध्योदनो गुडधाना इत्यादिवत्। अन्यथाऽत्रापि "अन्नेन व्यञ्जनम्" [पा० सू० २-१-३४] "भक्ष्येण मिश्रीकरणम्" [पा०सू० २-१-३५] इति समासो न स्यादिति वाच्यम्। तत्र विध्यानर्थक्यादगत्या तथास्वीकारेऽपि हरिकृतमित्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य कर्तृकरणे इत्यस्याऽऽक्षेपेण परम्परासंबन्धे प्रवृत्त्ययोगात्। न चैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमिति शङ्क्यम्। असूर्यंपश्या इत्यादेरसमर्थसमासत्वानापत्तेः। इष्टापत्तौ कृतः सर्वो मृत्तिकयेत्यत्र कृतसर्वमृत्तिक इत्यापत्तेः। न चात्र समासविधायकाभावः। "सह सुपा" [पा०सू० २-१-४] इत्यारम्भात्। अन्यथाऽसमर्थसमासोऽपि विधायकाभावान्न स्यादिति। किं च भावनायास्तिङर्थत्वे भावयति घटमितिवद्भवति घटमित्यपि स्यात्। धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्त्वात्। न चाऽऽख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्। आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्वे पाचयति देवदत्तो विष्णुमित्रेणेत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः। ग्रामं गमयति देवदत्तो विष्णुमित्रमित्यत्र विष्णुमित्रस्याकर्तृतापत्तौ ग्रामस्य गमिकर्मतानापत्तेश्च। तथा च ग्रामाय गमयति देवदत्तो विष्णुमित्रमित्यपि न स्यात्। "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" [पा० सू० २-३-१२] इति गत्यर्थकर्मण्येव चतुर्थीविधानात्। एतेन णिजन्त आख्यातार्थ उभयं तदाश्रयत्वाद्देवदत्तयज्ञदत्तयोः कर्तृतेत्यपास्तम्। किं च तस्मिन्प्रयोगे य आख्यातार्थ इत्यस्याऽऽवश्यकत्वेनाऽऽख्यातशून्ये देवदत्तः पक्तेत्यादौ देवदत्तस्याकर्तृतापत्तेरिति दिक्। सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति—किं चेति। धातुसंज्ञाविधायकं "भूवादयो धातवः" [पा० सू० १-३-१] इति सूत्रं, तत्र भूश्च वाश्चेति द्वंद्वः। आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः। ततो भूवावादी येषामिति बहुव्रीहिः। तथा च भूप्रभृतयो

---

१ च. कर्तृवाच्यता स्या°। २ क. ख. °पि तस्याऽऽ°।

वासदृशा धातव इत्यर्थः । तच्च क्रियावाचकत्वेन । तथा च क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं पर्यवसन्नम् । अत्र हि क्रियावाचित्वमात्रोक्तौ वर्जनादिरूपक्रियावाचके हिरुङ्नानेत्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वमुक्तम् ॥ ९ ॥

तावन्मात्रोक्तौ चाऽऽह—

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः ।
न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम् ॥ १० ॥

गणपठितत्वमात्रोक्तौ सर्वनामा यो धा तस्यापि धातुत्वं स्यात् । तथा च याः पश्यसीत्यादौ "आतो धातोः" [पा० सू० ६-४-१४०] इत्यालोपापत्तिः । ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं तस्य लाक्षणिकत्वात्, इत्यत आह—वेत्यादि । अव्यये वेत्यादावतिप्रसङ्गस्तादृशस्यैव गणेऽपि पाठेन निर्णयासंभवात् । तथा च विकल्पार्थको वातीति प्रयोगः स्यादिति भावः । न च गतिगन्धनाद्यर्थनिर्देशो नियामकः । तस्यार्थानादेशनादितिभाष्यपर्यालोचनयाऽऽधुनिकत्वलाभात् ॥ १० ॥

नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं क्रिया च धात्वर्थ एव न व्यापार इति शङ्कां समाधत्ते—

धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता ।
अन्योन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाकरम् ॥ ११ ॥

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं पूरयित्वा व्याख्येयम् । यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ग्रहे वाऽप्रतिबन्धकत्वाभ्युपगमेनासंगत्यापत्तेः । न चान्यतमत्वं धातुत्वम् । "भूवादयः" इत्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याऽऽह—अस्त्विति । व्यापारसंतानः क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः । ननु सत्तादीन्फलांशानन्यतमत्वेनाऽऽदाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम् । धात्वर्थत्वात्तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यत इति चेन्न । अन्यतममध्ये विकल्पस्यापि विकल्पयतीतिप्रयोगानुसारात्प्रवेशावश्यकत्वेन तदर्थके वेत्यव्यय उक्तरीत्या गणपठितत्वसत्त्वेनातिव्याप्तेरिति ॥ ११ ॥

नन्वस्यैव धातुत्वेऽस्तीत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तदवाचकानामधातुत्वप्रसङ्ग इत्यत आह—

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥ १२ ॥

अस्त्यादौ "अस् भुवि" इत्यादौ **धर्म्यंशे** +धर्मिभागे **भाव्ये** भाव्यत्वेन विवक्षितेऽ-**स्त्येव** प्रतीयत एवायमर्थः । स ततो गतो न वेति प्रश्ने महता यत्नेन तिष्ठतीति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव । उत्पत्त्यादिबोधने तु सुतरां "रोहितो लोहितादासीद्बुन्धुस्तस्य सुतोऽभवत्" इत्यादिदर्शनात् । किं चात्र भावनाविरहे लडादिव्यवस्था न स्यात् । तस्या एव वर्तमानत्वादिविवक्षायां तद्विधानात् । " क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका " इति **वाक्यपदीयादिति** । नन्वेवमस्तीत्यत्र स्पष्टं कुतो न बुध्यत इत्याह—**अन्यत्रेति** । **अशेषभावात्**, भावनायाः फलसमानाधिकरणत्वात् । तथा च भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः । नन्वेवं किं करोतीति प्रश्ने पचतीत्युत्तरस्येवास्तीत्युत्तरमपि स्यादिति चेदिष्टापत्तिः । आसन्नविनाशं कंचिदुद्दिश्य किं करोतीति प्रश्नेऽस्तीत्युत्तरस्य सर्वसंमतत्वात् । इतरत्र तु सुस्थतया निश्चिते किं करोतीति प्रश्नः पच्यादिविशेषगोचर एवेत्यवधारणादस्तीति नोत्तरमिति ॥ १२ ॥

ननु भावनायाः फलनियतत्वात्फलाश्रयस्य कर्मत्वात्सर्वेषां क्रियावाचकत्वे सकर्मकतापत्तिरित्यत आह—

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥ १३ ॥

एकनिष्ठतायामेकमात्रनिष्ठतायां भिन्नाधिकरणावृत्तितायामिति यावत् । तेन गम्यादौ फलस्य कर्तृनिष्ठत्वेऽपि नातिव्याप्तिः । **अकर्मको** यथा भ्वादिः । **तयोः** फलव्यापारयोराश्रयभेदे **सकर्मक** इत्यर्थः ।

उक्तं च वाक्यपदीये—

" आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः " इति ॥

बिभ्रदिति । स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत इति भावः । **तेन** कर्मणा सकर्मकत्वं तु **नान्तर्भावात्** । फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः । आत्मानं नातिच्छतीत्यादौ च द्वावात्मानौ शरीरात्माऽन्तरात्मा च । तत्रान्तरात्मा तत्कर्म रोति येन शरीरात्मा सुखदुःखे अनुभवतीति " कर्मवत्कर्मणा " [पा० सू० ३-१-.७] इतिसूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्मकत्वमित्यवधेयम् ॥ १३ ॥

+ कर्तृगते फले ।

---

१ ख. छ. ज. °श्रः । पाकादिं° । २ क. च. °णता° ।

(धात्वर्थाख्यातसामान्यार्थनिर्णयः)

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे पाक इत्यत्रापि तत्प्रत्ययापत्तिः । न चेष्टापत्तिः, "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इतिभाष्यविरोधादित्यत आह—

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता ।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥ १४ ॥

आख्यातशब्दे । पश्य मृगो धावतीत्यादौ । **भागाभ्यां** तिङन्ताभ्याम् । प्रकृति-प्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानं पचतीत्यत्रापि भागद्वयसत्त्वात् । **साध्यसाधनरूपता** । यथाक्रमं ग्राह्या । साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम् । **साधनत्वं** कारकत्वेनान्वयित्वम् । **स घञादिष्वपीति** । प्रकृत्या साध्यावस्था प्रत्ययेन साधनावस्था । इयान्विशेषः । घञाद्युपस्थाप्या लिङ्गसंख्यान्वयिनी कारकान्वयिनी च । आख्यातान्तोपात्ता तु नैवम् । तथाऽपि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम् । न च घञन्ते धातुना *तथाभिधाने मानाभावः । ओ¶दनस्य पाक इति कर्मणि षष्ठ्या मानत्वात् । न च भवती+त्यध्याहृतक्रियान्वयात्षष्ठी " कर्तृकर्मणोः कृति " [पा० सू० २-३-६५] इति कृदन्तेन योग एव तद्विधानात् । " न लोकाव्ययनिष्ठाखलर्थतृनाम् " [पा० सू० २-३-६९] इति लादेशयोगे षष्ठ्या निषेधाच्च । एवं रीत्या काष्ठैः⊙ पाक इत्याद्यपीष्टमेव । एवं फलांशोऽपि धातुनाऽसत्त्वावस्थापन्न एवोच्यते । अत एव स्तोकं पचतीतिवत्स्तोकं पाक इत्युपपद्यत इति ॥ १४ ॥

एतदेव स्पष्टयति—

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥ १५ ॥

न च घञादिभिः सिद्धत्वेनाभिधाने मानाभावः । पाक इत्युक्ते भवति जायते नष्ट इत्याकाङ्क्षोत्थानस्यैव मानत्वात् । धातूपस्थाप्यायां तदसंभवस्योक्तत्वात् । स्तोकः पाक इत्यनापत्तेश्च । तस्माद्धात्वर्थान्वये स्तोकादिशब्देभ्यो द्वितीया । घञर्थान्वये प्रथमा पुंलिङ्गता चेति $तत्सिद्धये घञादेः शक्तिरुपेया । ÷एतेन घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्तमपास्तम् । न च घञन्तशक्त्योपस्थाप्यान्वये स्तोकः पाक इति भवतीति वाच्यम् । †घञन्तानुपूर्व्याः शक्तितावच्छेदकत्वे गौरवादनुशास-

---

* उक्तसाध्यत्वेन रूपेण क्रियाया वाच्यत्व इत्यर्थः । ¶ साध्यस्वभावाध्याहृतभवत्यर्थस्य परम्परान्वयादित्यर्थः । + तण्डुलस्येत्यर्थः । ⊙ तन्निरूपितकरणत्वात् । $ नपुंसकत्वाद्युपपत्तये । ÷ सार्थकत्वप्रतिपादनेन । † पचादिधातूत्तरघञ्त्वरूपायाः ।

°१ छ. °नरूपता । २ ख. ङ. °च. छ. ज. °करूं । ३ क. च. °ञन्तधा° ।

नाच्च *घञादेरेव तथाशक्तिकल्पनादिति दिक् । †एवं च घञ्शक्त्यभिप्रायेण कृदभिहित इति भाष्यमतो न तद्विरोध इति भावः ॥ १५ ॥

ननु कारकाणां भावनान्वयनियम एव पाक इत्यत्रापि कर्मषष्ठ्यनुसारेण भावनाया वाच्यत्वं सिध्येत्तदेव कुत इत्याशङ्कां समाधत्ते—

संबोधनान्तं कृत्वोर्थाः कारकं प्रथमो वतिः ।
धातुसंबन्धाधिकारनिष्पन्नमसमस्तनञ् ॥ १६ ॥

संबोधनान्तस्य क्रियायामन्वयः । त्वं ब्रूहि देवदत्तेत्यादौ निघातानुरोधात् । " समानवाक्ये निघातयुष्मदस्मदादेशाः " इत्यनेन समानवाक्य एव तन्नियमात् ।

उक्तं हि वाक्यपदीये—

" संबोधनपदं यच्च तत्क्रियाया विशेषणम् ।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति " इति ॥

पचति भवति देवदत्तेत्यादौ तु सूत्रभाष्यादिरीत्यैकवाक्यतासत्त्वात्स्यादेव निघातः । " तिङ्ङतिङः " [पा० सू० ८-१-२८] इति सूत्रयता तिङन्तानामप्येकवाक्यतास्वीकारात् । एकतिङ्वाक्यमिति वदतां वार्तिककाराणां मते परं न । वस्तुत एकतिङ्विशेष्यकं वाक्यमिति तदभिप्रायस्य हेलाराजीयादौ वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि भवत्येवेत्यवधेयम् । **कृत्वोर्थाः**, " क्रियाभ्यावृत्तिगणने कृत्वसुच् " [पा० सू० ५-४-१७] इति क्रियायोगे तत्साधुत्वोक्तेः । क्रियाया अभ्यावृत्तिः पुनः पुनर्जन्म, +तस्मिन्द्योत्य इति तदर्थात् । **कारकम्** । कारक इत्यधिकृत्य तेषां व्युत्पादनात् । कारकशब्दो हि क्रियापरः करोति कर्तृकर्मादि व्यपदेशानिति व्युत्पत्तेः । तथा चाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम् । **प्रथमो वतिः** । " तेन तुल्यं क्रिया चेद्वतिः " [पा० सू० ५-१-११५] इति विहितः । तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात् । **धातुसंबन्धाधिकारे** । "धातुसंबन्धे प्रत्ययाः" [पा० सू० ३-४-१] इत्यधिकृत्य तेषां विधानात् । **असमस्तनञ्** । समासायोग्यः प्रसज्यप्रतिषेधीयो नञित्यर्थः । उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षेऽसमस्तत्वात् । यथाश्रुतग्रहणायोगात् । न चासमस्तनञः क्रियान्वये मानाभावः । न त्वं पचसि न युवां पचथः चैत्रो न पचति घटो न जायत इत्यादौ क्रियाया एव निषेधप्रतीतेः । =अत एव विद्यमानेऽपि घटे तथाप्रयोग-

---

* तदपेक्षया घञ्त्वस्य शक्तितावच्छेदकत्वे लाघवम् । † सिद्धभावे शक्तिसिद्धौ । + पञ्चकृत्वो भुङ्क्ष इत्यत्र भोजनस्य पञ्चवारं प्रतीतेः । = घटस्यानिषेधादेव ।

स्तथा च घटो नास्तीत्यत्राप्यस्तित्वाभाव एव बोध्यते । न हि घटो न जायते नास्तीत्यनयोर्धात्वर्थभेदमन्तरेणास्ति विशेषः । तथा च भूतले न घट इत्यत्राप्यस्तीत्यध्याहार्यम् । प्रकारतासंबन्धेन नञर्थविशेष्यकबोधे धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात् । शेषं नञर्थनिर्णये वक्ष्यते ॥ १६ ॥

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम् ।
साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम् ॥ १७ ॥

" यस्य च भावेन भावलक्षणम् " [पा० सू० २-३-३७] इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात् । " *षष्ठी चानादरे " [पा० सू० २-३-३८] इति तदग्रिमसूत्रेऽपि चकाराद्यस्य च भावेनेत्यायातीत्यर्थः । **साधुत्वमिति** । तत्स्वरूपं तु वक्ष्यते । **क्रिययैवेति** । अयं भावः—भूवादिसूत्रादिषु प्रायः+ क्रियाशब्देन भावनाव्यपदेशात्तत्र तस्य सांकेतिकी शक्तिः फलांशे क्वचित्कः क्रियत इति यौगिकः प्रयोगः । तथा च संज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेन बलवत्त्वाद्भावनान्वय एव साधुता लभ्यते । अत एव संज्ञाशब्दप्राबल्याद्रथंतरमुत्तराग्रन्थपठितऋक्ष्वेव गेयं न तु वेदे तदुत्तरपठ्यमानऋक्ष्विति नवमे निर्णीतम् । किं च फलांशोऽपि भावनायां विशेषणं कारकाण्यपि क्वचित्तथाभूतानीति " गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात् " इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाण्यन्वियन्ति । न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुक इति न्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियन्तीति **मीमांसका** अपि मन्वते, एवं च विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुरिति कार्यकारणभावस्य क्लृप्तत्वाद्यत्रापि पक्ता पाचक इत्यादौ भावना गुणभूता तत्रापि क्लृप्तकार्यकारणभावानुरोधात्तस्यामेवान्वय इत्यवसीयत इत्यादि भूषणे प्रपञ्चितम् । केचित्तु भूतले घटो देवदत्तो घटमित्यादावन्वयबोधाकाङ्क्षानिवृत्त्योरदर्शनान्न तद्व्यतिरेकेण साधुत्वलाभ इत्याहुः ॥ १७ ॥

स्वयमुपपत्तिमाह—

यदि पक्षेऽपि वत्यर्थः कारकं च नञादिषु ।
अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना ॥ १८ ॥

पर्वतो वह्निमान्धूमान्महानसवत् । भूतले न घटः । भूतले घट इत्यादिपदात् । एवमा-

---

* रुदति रुदतो वा प्राव्राजीत् । + क्रियाशब्देन फलस्यापि भाष्ये ग्रहणात् ।

---

१ ख. ग. ङ. च. 'राद्भावे' । २ छ. 'नेत्यप्यन्वेती' । ३ ङ. चतुर्थ्या ।

दिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयश्चाभ्युपेयते तर्हि चतुर्थ्याः स्पृहिकल्पनाऽपि त्यज्यतामित्यर्थः । अनुशासनानुरोधतौल्येऽर्धजरतीयमयुक्तमिति भावः ॥ १८ ॥

एवं कर्त्रादौ विहितानामिन्यादीनां क्रियायैवान्वय इत्याह—

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
क्रिया संबध्यते तद्वत्कृतपूर्व्यादिषु स्थिता ॥ १९ ॥

न विविच्य ग्रहो ग्रहणं यस्याः साऽविग्रहा गुणीभूतेति यावत् । तथा च ग्रामं गत इत्यत्र यथा क्तप्रकृत्यर्था गुणीभूताऽपि क्रिया ग्रामादिकर्मभिः संबध्यते तथा कृतपूर्वी कटमित्यत्रापि गुणभूतां, इन्यादिभिरित्यर्थः । न च वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात्तत्रान्तर्गता भावना पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यम् । नित्यसापेक्षेष्वेकदेशेऽपि देवदत्तस्य गुरुकुलं चैत्रस्य नक्षेत्यादाविवान्वयाभ्युपगमात् । एवं भोक्तुं पाको भुक्त्वा पाक इत्यत्रापि द्रष्टव्यम् ॥ १९ ॥

अतिप्रसङ्गमाशङ्क्य समाधत्ते—

कृत्वोर्थाः क्त्वातुमुन्वत्स्युरिति चेत्सन्ति हि क्वचित् ।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात् ॥ २० ॥

भोक्तुं पाको भुक्त्वा पाक इत्यादौ " तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् " [पा० सू० ३-३-१०] " समानकर्तृकयोः पूर्वकाले " [पा० सू० ३-४-२१] इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुनादयो गुणभूतां तामादाय यथा जायन्ते तथा कृत्वोर्था अपि स्युरेकः पाक इत्यत्र " एकस्य सकृच्च " [पा० सू० ५-४-१९] द्वौ पाकौ त्रयश्चत्वार इत्यत्र " द्वित्रिचतुर्भ्यः सुच् " [पा० सू० ५-४-१८] पञ्चेत्यत्र कृत्वसुच् स्यात् । तथा च सकृत्पाकः, द्विस्त्रिश्चतुः पाका इत्याद्यापत्तिरिति चेदिष्टापत्तिः । द्विर्वचनमित्यादिदर्शनात् । अतिप्रसङ्गस्त्वनभिधानान्नेत्याह—अतीति । " न हि वाचिरान्तिपरः प्रयुज्यते " इत्याद्यभियुक्तरीत्या समाधेयमिति भावः । केचित्तु " क्रियाभ्यावृत्तिगणने " इत्यत्र क्रियाग्रहणं व्यर्थं तस्या एवाभ्यावृत्तिसंभवेन सामर्थ्यात्तल्लाभात् । तथा च साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम् । न च पाक इत्यादौ तादृशीति नातिप्रसङ्गः । द्विर्वचनमिति च द्विः प्रयोगो द्विर्वचनमिति व्युत्पत्त्या " द्विर्वचनेऽचि " [पा० सू० १-१-५९] इति ज्ञापकं वाऽऽश्रित्योपपादनीयमित्याहुः ॥ २० ॥

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकीति धातोरेव भावना वाच्या नाऽऽख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते—

---

१ क. ख. ग. च. °प्रत्ययार्थगु° । २-च. °ता कटादि° ।

(धात्वर्थाख्यातसामान्यार्थनिर्णयः)

भेद्यभेदकसंबन्धोपाधिभेदनिबन्धनम् ।
साधुत्वं तदभावेऽपि बोधो नेह निवार्यते ॥ २१ ॥

(इति भट्टोजिदीक्षितविरचितकारिकासु धात्वर्थाख्यातसामान्यार्थनिर्णयः ।)

भेद्यं विशेष्यं भेदकं विशेषणं तयोर्यः संबन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वम् । अयमर्थः—व्याकरणस्मृतिः शब्दसाधुत्वपरा, तत्रैवावच्छेदकतया कल्प्यमानधर्मस्य[1] शक्तित्वं वदतां मीमांसकानां[+] पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णय एव शक्तिनिर्णय उच्यते । अतिरिक्तशक्तिवादेऽपि * आख्यातानामसाधुता भावनायां स्यादेव । तथा च चतुर्थ्यर्थे तृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगे याज्ञे कर्मण्यसाधुशब्दप्रयोगात् " नानृतं वदेत् " इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादिति । + ननु स्वन्मते नानृतमिति निषेधः क्रत्वर्थ एव न सिध्येत् । आख्यातेन कर्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात् । प्रकरणाद्धि क्रत्वर्थता, तच्च श्रुतिविरोधेन[2] बाध्यत इति चेन्न । "तिङर्थस्तु विशेषणम्" इत्यनेन परिहृतत्वात् । न हि गुणभूतः कर्ता निषेधं साङ्गत्वेन ग्रहीतुमलम् । भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकरणात्क्रत्वर्थतैव । अस्तु वा क्रतुयुक्तपुरुषधर्मः । अनुष्ठाने विशेषाभावात् । " जक्षन्भ्यमानोऽनुब्रूयान्मयि दक्षक्रतू[3] " इतिवाक्योक्तमन्त्रविधिवदित्यादि भूषणे प्रपञ्चितम् । नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात्साधुत्वज्ञानस्य शाब्दबोधहेतुत्वादित्यत आह—बोध इति । असाधुत्वेऽपि साधुत्वभ्रमाद्बोधोऽस्तु नाम, अपभ्रंशवत् । असाधुत्वं तु स्यादेवेति भावः । वस्तुतः साधुत्वज्ञानं न हेतुस्तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इत्यसाधुरनुमानेनेत्यत्र वक्ष्यामः ॥ २१ ॥

=रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्मिते ।
पूर्णो भूषणसारेऽस्मिन्धात्वाख्यातार्थनिर्णयः ॥ १ ॥

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे धात्वर्थाख्यातसामान्यार्थनिर्णयः समाप्तः ॥

---

* शास्त्रेण हि यस्मिन्नर्थे यः शब्दः साधुत्वेन बोधितस्तत्रैव तस्य साधुत्वमिति भावः । + मीमांसकशङ्केयम् । = अयं श्लोको नास्ति ग. च. पुस्तकयोः ।

---

१ ख. ग. घ. च. 'ल्प्यधं' । २ क. ख. ग. छ. 'धे वा' । ३ छ. 'नो न ब्रू' ।

(लकारविशेषार्थनिर्णयः)

(अथ लकारविशेषार्थनिरूपणम् ।)

प्रत्येकं दशलकाराणामर्थं निरूपयति—

वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति ।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥ १ ॥ (२२)

लडादयष्टितः षट् क्रमेणार्थेषु द्रष्टव्याः । तथा हि—**वर्तमानेऽर्थे** लट् । " वर्तमाने लट् " [पा० सू० ३-२-१२३] इति सूत्रात् । प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम् । पचतीत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति भवति लट्प्रयोगः । आत्माऽस्ति पर्वताः सन्तीत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया *अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमोदाय वर्तमानत्वमूह्यम् । उक्तं च भाष्ये—"इह भूतभविष्यद्वर्तमानानां राज्ञां क्रियास्ति=छतेरधिकरणम् " इति ।

" परतो भिद्यते सर्वमात्मा तु न विकम्पते ।
पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यते ॥"

इति वाक्यपदीये च ।

एवं " तम आसीत् " " तुच्छ्येनाभ्वपिहितं यदासीत् " " अहमेकः प्रथममासं वर्तामि च भविष्यामि च " इत्यादिश्रुतयोऽपि योज्याः । तच्च वर्तमानत्वादि लडादिभिर्द्योत्यते । क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्यग्राहकत्वेनोपयोगात् । अन्वयव्यतिरेकाभ्यां तद्रूपं लडादि वाच्यमेव । अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरित्यपि पक्षान्तरम् ।

लिडर्थमाह—**परोक्ष इति** । " परोक्षे लिट् " [पा० सू० ३-२-११५] इति सूत्रात् । कालस्तावद्यतनानद्यतनभेदेन द्विविधः । द्विविधोऽपि भूतभविष्यद्रूपः । तत्रानद्यतने भूते परोक्षे लिडित्यर्थः । तेनाद्यतने भूतेऽनद्यतने भविष्यति भूतेऽप्यपरोक्षे च न लिट्प्रयोगः । परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम् । न च " क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम् " इति भाष्यात्तस्या अतीन्द्रियत्वेन परोक्ष इत्यव्यावर्तकमिति शङ्क्यम् । पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यवयवशः साक्षात्करोमीति प्रतीतिविषयत्वसंभवात् । अन्यथा पश्य मृगो धावतीत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति । व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतो नोक्तदोषः । अयं

---

* अनित्यत्वविशिष्टस्य । × आरोप्य । = स्थित्यादितद्व्यापारस्य । + कालिकसंबन्धेनेति शेषः ।

(लकारविशेषार्थनिर्णयः)

पपाचेत्याद्यनुरोधा*द्व्यापाराविष्टानामितीत्यपि वदन्ति । कथं तर्हि " व्यातेने किरणावलीमुदयनः " इति, स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत् । असंगतमेव । व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽप्यनद्यतनातीतत्वयोरभावेन तदर्थकलिडसंभवात् ।

लुडर्थमाह—**श्वोभाविनीति** । अनद्यतने भाविनीत्यर्थः । " अनद्यतने लुट् " [पा० सू० ३-३-१५] इति सूत्रात् । यथा श्वो भवितेत्यादौ ।

लृडर्थमाह—**भविष्यतीति** । भविष्यत्सामान्य इत्यर्थः । " लृट् शेषे च " [पा० सू० ३-३-१३] इति सूत्रात् । यथा घटो भविष्यतीत्यादौ । तत्त्वं च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम् ।

लेटोऽर्थमाह—**विध्यादाविति** । " लिङर्थे लेट् " [पा० सू० ३-४-७] इति सूत्रात् । लिङर्थश्च विध्यादिरिति वक्ष्यते ।

लोडर्थमाह—**प्रार्थनादाविति** । आदिना विध्याद्याशिषो गृह्यन्ते । " आशिषि लिङ्लोटौ " [पा० सू० ३-३-१७३] "लोट् च" [पा० सू० ३-३-१६२] इति सूत्राभ्यां तथावगमात् । यथा भवतु ते शिवप्रसाद इत्यादावेतयोरर्थो लिङर्थ एव त्रयाणां समानार्थत्वादिति +तन्निर्णयेनैव निर्णयः ॥ १ ॥ (२२)

लङादिक्रमेण ङितामर्थमाह—

ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः ।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ्स्मृतः ॥ २ ॥ (२३)

(इति भट्टोजिदीक्षितविरचितकारिकासु लकारविशेषार्थनिर्णयः ।)

लङर्थमाह—**ह्योभूत इति** । अनद्यतने भूत इत्यर्थः । " अनद्यतने लङ् " [पा० सू० ३-२-१११] इति सूत्रात् । यथाऽस्य पुत्रोऽभवदित्यादि ।

लिङर्थमाह—**प्रेरणादाविति** । "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्" [पा० सू० ३-३-१६१] इति सूत्रात् । **विधिः** प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम् । **निमन्त्रणं** नियोगकरणम् । आवश्यके प्रेरणेत्यर्थः । **आमन्त्रणं** कामचारानुज्ञा । **अधीष्टः** सत्कारपूर्वको व्यापारः । एतच्चतुष्टयानुगतप्रवर्तनात्वेन वाच्यता लाघवात् ।

उक्तं च—

" अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥

---

* एवं चातीतानद्यतनव्यापाराविष्टपरोक्षकर्तृकक्रियावृत्ताद्धातोर्लिडिति सूत्रार्थः । † मनोसंनिधानादिति शेषः । + लिङर्थनिर्णयेन ।

• १ छ. °नुरूपं च° ।

न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।
विध्यादीनामुपादानं चतुर्णामादितः कृतम् " इति ॥

प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्* । ÷तच्चेष्टसाधनत्वस्यास्तीति तदेव† विध्यर्थः । यद्यप्येतत्कृतिसाध्यत्वस्यापि तज्ज्ञानस्यापि[1] प्रवर्तकत्वात्तथाऽपि यागादौ सर्वत्र तल्लोकत एवावगम्यत इत्यन्यलभ्यत्वान्न तच्छक्यम् । बलवदनिष्टाननुबन्धित्वज्ञानं च न हेतुः । द्वेषाभावेनान्यथासिद्धत्वात् । आस्तिककामुकस्य नरकसाधनताज्ञानदशायामप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च । तस्मादिष्टसाधनत्वमेव प्रवर्तना ।

उक्तं च मण्डनमिश्रैः—

" पुंसां नेष्टाप्युपायत्वात्क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् " इति ॥

प्रपञ्चितं चैतद्वैयाकरणभूषणे । आदिना " हेतुहेतुमतोर्लिङ् " [पा० सू० ३-३-१५६] " आशिषि लिङ्लोटौ " [पा० सू० ३-३-१७३] इतिसूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते । " यो ब्राह्मणायावगुरेत्तं शतेन[2] यातयात् " इति यथा ।

लुङर्थमाह—**भूतमात्र इति** । भूतसामान्य इत्यर्थः । भूत इत्यधिकृत्य " लुङ् " [पा० सू० ३-२-११०] इति सूत्रात् । अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम् । तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः । विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः । अयमत्र संग्रहः—कालो द्विविधः । अद्यतनोऽनद्यतनश्च । आद्यस्त्रिविधः । भूतभविष्यद्वर्तमानभेदात् । अन्त्यो द्विविधः । भूतो भविष्यश्च । तत्र वर्तमानत्वे लट् । भूतत्वमात्रे लुङ् । भविष्यन्मात्रे लृट् । हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ् । अनद्यतने भूते तत्त्वेन विवक्षिते लङ् । तत्रैव परोक्षत्वविवक्षायां लिट् । तादृशे भविष्यति लुट्, इति द्रष्टव्यम् ।

लृङर्थमाह—**सत्यामिति** । क्रियाया अतिपत्तिरनिष्पत्तिस्तस्यां गम्यमानायाम् । **भूते भाविनि** हेतुहेतुमद्भावे सति लृङित्यर्थः । " लिङ्निमित्ते लृङ् क्रियातिपत्तौ " [पा० सू० ३-३-१३९] इति सूत्रात् । लिङो निमित्तं हेतुहेतुमद्भावादि । यथा सुवृष्टिश्चेदभविष्यत्सुभिक्षमभविष्यत् । वह्निश्चेत्प्राज्वलिष्यदोदनमपक्ष्यदित्यादौ । अत्र वह्न्यभिन्नाश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयुक्त ओदनाभिन्नाश्रयक-

---

* ज्ञाननिष्ठप्रवृत्तिजनकतायां प्रकारितयाऽवच्छेदकत्वम् । ÷ निरुक्तावच्छेदकत्वं चेत्यर्थः ।
† एवकारेण पराभिमतकृतिसाध्यत्वादिव्यवच्छेदः ।

---

१ छ. तज्ज्ञान° । २ च. °न पाययेत् ।

(सुबर्थनिर्णयः)

विक्लित्त्यनुकूलव्यापाराभाव इति शाब्दबोध इतिरीत्या द्रष्टव्यम् । अयं चार्थनिर्देश उपलक्षणम् । अर्थान्तरेऽपि बहुशो विधानदर्शनात् । प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या वोक्तम् । एतेषां क्रमनियामकश्चानुबन्धक्रम एव । अत एव पञ्चमो लकार इत्यनेन मीमांसकैर्लेड् व्यवह्रियत इति दिक् ॥ २ ॥ (२३)

इति श्रीकौण्डभट्टविरचिते वैयाकरणभूषणसारे लकारविशेषार्थ-
निरूपणं समाप्तम् ।

(अथ सुबर्थनिर्णयः ।)

सुबर्थमाह—

आश्रयोऽवधिरुद्देश्यः संबन्धः शक्तिरेव वा ॥
यथायथं विभक्त्यर्थः सुपां कर्मेति भाष्यतः ॥ १ ॥ (२४)

द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः । तथा हि—"कर्मणि द्वितीया" [पा० सू० २-३-२] । तच्च कर्तुरीप्सिततमं [पा० सू० १-४-४९] क्रियाजन्यफलाश्रय इत्यर्थः । क्रियाजन्यफलवत्त्वेन कर्मण एव कर्तुरीप्सिततमत्वात् । "तथा युक्तं चानीप्सितम्" [पा० सू० १-४-९०] इत्यादिसंग्रहाच्चैवमेव युक्तम् । ईप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगो न तु वाच्यकोटौ तत्प्रवेशः । तथा च क्रियायाः फलस्य धातुनैव लाभादनन्यलभ्य आश्रय एवार्थः । तत्त्वं चाखण्डशक्तिरूपमवच्छेदकम् । ओदनं पचतीत्यत्र विक्लित्त्याश्रयत्वात्कर्मता । घटं करोतीत्यत्रोत्पत्त्याश्रयत्वात् । उत्पत्तेर्धात्वर्थत्वात् । जानातीत्यत्राऽऽवरणभङ्गरूपज्ञाधात्वर्थफलाश्रयत्वात् । अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्याऽऽवश्यकत्वात् । *अन्यथा यथापूर्वं न जानामीत्यापत्तेः । अतीतादेराश्रयता च विषयतया ज्ञानाश्रयताया **नैयायिकानामिव** सत्कार्यवादसिद्धान्ताद्वोपपद्यत इति ।

उक्तं च—

"तिरोभावाभ्युपगमे भावानां सैव नास्तिता ।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते" इति ॥

ननु चैत्रो ग्रामं गच्छतीत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्रयत्वात्कर्मतापत्तौ चैत्रश्चैत्रं गच्छतीत्यापत्तिः । प्रयागतः काशीं गच्छति चैत्रे

---

* तादृशघट आवरणभङ्गास्वीकारे ।

प्रयागं गच्छतीत्यापत्तिश्च । क्रियाजन्यसंयोगस्य काश्यामिव *विभागस्य प्रयागेऽपि सत्त्वादिति चेन्न । ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन चैत्रश्चैत्रमिति प्रयोगासंभवात् । द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात् । अन्यथा गमयति कृष्णं गोकुलमित्यत्रेव पाचयति कृष्णेनेत्यत्रापि कृष्णपदाद्द्वितीया†-पत्तेः । शाब्दबोधश्चैत्रश्चैत्रमित्यत्र स्यादिति चेन्न । तथा व्युत्पन्नानामिष्टापत्तेः । उच्यतां वा प्रकारतासंबन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्यकारणभावान्तरम् । प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः । प्रयागस्य कर्मत्वं तु संभावितमपि न । समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्योक्तप्रायत्वात् । नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वं द्वितीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वितीयावाच्यमित्युपाददते । परसमवेतत्वं धात्वर्थक्रियायामन्वेति । तथैव कार्यकारणभावान्तरकल्पनात् । परत्वमपि द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते । तथा च चैत्रस्तण्डुलं पचतीत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात्तण्डुलानां कर्मता । शाब्दबोधस्तु तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्यसमवेतक्रियाजनककृतिमांश्चैत्र इत्याहुः । तन्न रोचयामहे । परसमवेतत्वादेर्गौरवेणावाच्यत्वात् । अतिप्रसङ्गः= किं द्वितीयायाः, शाब्दबोधस्य वा । नाऽऽद्यस्तावत् । वाच्यकथनेऽपि तत्तादवस्थ्यात् । गमयति कृष्णं गोकुलमितिवत्पाचयति कृष्णं गोप इत्यापत्तेः । तण्डुलं पचति चैत्र इतिवत्तण्डुलं पच्यते स्वयमेवेत्यापत्तेश्च । विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थाश्रयत्वात् । शाब्दबोधातिप्रसङ्गोऽप्युक्त×रीत्यैव निरस्तः । परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य परसमवेतत्वस्य चेष्टान्वयलाभायानेकशः कार्यकारणभावाभ्युपगमे गौरवतरत्वादिति स्पष्टं भूषणे ।

एतच्च सप्तविधम्—

" निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
+तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम् ॥
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् " इति वाक्यपदीयात् ॥

---

* क्रियाजन्येत्यादि । † द्वितीयव्यापारजन्यफलाश्रयेऽपि संज्ञां विना स्यादिति भावः । ‡ हेतुतृतीया । = प्रामाणिकं गौरवं न दोषायात आह । × तथा व्युत्पन्नानामित्युक्तरीत्या । + निरुक्तं कर्म ।

---

१ क. ङ. छ. °धश्चैत्रमि° । २ ङ. ज. °पारव्यधिकरणफलस्य धातुजन्यतयोप° । ३ ङ. ज. °त्रनिष्ठसंयोगस्य तदीयव्यापारव्यधि° ।

(सुबर्थनिर्णयः)

" यदसज्जायते सद्वा जन्मना यत्प्रकाशते ।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम् ॥
प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादि भस्मवत् ।
किंचिद्गुणान्तरोत्पत्त्या सुवर्णादि विकारवत् ॥
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते " ॥

इति च तत्रैवोक्तम् । घटं करोतीत्याद्यम् । काष्ठं भस्म करोतीति सुवर्णं कुण्डलं करोतीति च द्वितीयम् । घटं पश्यतीति तृतीयम् । तृणं स्पृशतीत्युदासीनम् । विषं भुङ्क्ष इति द्वेष्यम् । गां दोग्धीति संज्ञातरै+रनाख्यातम् । क्रूरमभिक्रुध्यतीत्यन्यपूर्वकम् । कर्तृतृतीयाया आश्रयोऽर्थः । तथा हि—"स्वतन्त्रः कर्ता" [पा० सू० १-४-५४] । स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वं " धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते " इति वाक्यपदीयात् । अत एव यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्तेति स्थाली पचति, अग्निः पचति, एधांसि पचन्ति, तण्डुलः पच्यते स्वयमेवेत्यादि संगच्छते । नन्वेवं "कर्मकर्तृव्यपदेशाच्च" [ब्र० सू० १-२-४] इति सूत्रे मनोमयः प्राणशरीर इतिवाक्यस्थमनोमयस्य जीवत्वे वाक्यशेषे तस्य "एतमितः प्रेत्याभिसंभविताऽस्मि" इति प्राप्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं संगच्छताम् । उच्यते—जीवस्यैव ज्ञेयत्वे प्राप्तिकर्मत्वमपि वाच्यम् । कर्तृत्वं च तस्याऽऽख्यातेनोक्तम् । न चैकस्यैकदा संज्ञाद्वयं युक्तम् । कर्तृसंज्ञया कर्मसंज्ञाया बाधात् । तथा चैतमिति द्वितीया न स्यात् । कर्मकर्तृतायां च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवति स भेदहेतुः । एवं च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयार्थः । कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा दण्डः करोतीत्यत्राव्याप्तम् । अयं च त्रिविधः । शुद्धः प्रयोजको हेतुः कर्मकर्ता च । मया हरिः सेव्यते । कार्यते हरिणा । गमयति कृष्णं गोकुलम् । मदभिन्नाश्रयको हरिकर्मकसेवनाकूलो व्यापारः । हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः । गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलो व्यापार इति शाब्दबोधः । करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ । तथा हि—"साधकतमं करणम् " [पा० सू० १-४-४२] । तमबर्थः प्रकर्षः । स चाव्यवधानेन फलजनकव्यापारवत्ता । तादृशव्यापारवत्कारणं च करणम् ।

उक्तं च वाक्यपदीये—

"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥

+ अविवक्षितम् ।

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः" इति ॥

विवक्ष्यत इत्यनेन सकृदनेकेषां तदभावाद्द्वितीयासप्तम्यादेरवकाशं सूचयति । न चैवं " कर्ता शास्त्रार्थवत्त्वात् " [ब्र० सू० २-३-३३] इत्युत्तरमीमांसाधिकरणे " शक्तिविपर्ययात् " [ब्र० सू० २-३-३८] इति सूत्रेणान्तःकरणस्य कर्तृत्वे करणशक्तिविपर्ययापत्तिरुक्ता न युज्येतेति वाच्यम् । " तदेवैतेषां †प्राणानां विज्ञानेन =विज्ञानमादाय " इति श्रुत्यन्तरे करणतया ×कृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्ययापत्तिर्निष्प्रमाणा कल्प्येतेत्यभिप्रायात् । वस्तुतस्त्वभ्युच्चयमात्रमेतदिति " यथा च तक्षोभयथा " [ब्र० सू० २-३-४०] इत्यधिकरणे भाष्य एव स्पष्टमित्यादि प्रपञ्चितं भूषणे । सप्तम्या अप्याश्रयोऽर्थः । " सप्तम्यधिकरणे च " [पा० सू० २-३-३६] इत्यधिकरणे सप्तमी । तच्च " आधारोऽधिकरणम् " [पा० सू० १-४-४५] इति सूत्रादाधारः । तच्चाऽऽश्रयत्वम् । तत्राऽऽश्रयांशः शक्यः । तत्त्वमवच्छेदकम् । न चाऽऽश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा स्यात् । स्यादेव यदि तामिरस्या न बाधः स्यात् । "कारके" [पा० सू० १-४-२३] इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव यद्यपि तात्पर्यं तथाऽप्यत्र कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति स्थाल्यां पचति भूतले वसति कटे शेत इत्याद्युपपद्यते ।

उक्तं च वाक्यपदीये—

"कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् ।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् " [इति ॥]

एतच्च त्रिविधम् । औपश्लेषिकं वैषयिकमभिव्यापकं च । कटे शेते गुरौ वसति मोक्ष इच्छाऽस्ति तिलेषु तैलमिति । एतच्च "संहितायाम्" [पा० सू० ६-१-७२] इति सूत्रे भाष्ये स्पष्टम् ।

अवधिः पञ्चम्यर्थः । " अपादाने पञ्चमी " [पा० सू० २-३-२८] । तच्च " ध्रुवमपायेऽपादानम् " [पा० सू० १-४-२४] इति सूत्रादपायो विश्लेषस्तज्जनकक्रिया तत्रावधिभूतमपादानमित्यर्थकादवधिभूतमिति भावः ।

+ अभावेत्यर्थः । † इन्द्रियाणाम् । × मनसा बुद्धया वा । = ग्रहणशक्तिम् ।

उक्तं च वाक्यपदीये—

" अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥
पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ॥
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके ।
विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते ॥
मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् " इति ॥

अस्यार्थः—**अपाये** विश्लेषहेतुक्रियायाम् । **उदासीनमनाश्रयः** । **अतदावेशात्तत्क्रियानाश्रयत्वात्** । एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम् । 'वृक्षात्पर्णं पततीत्यत्र पर्णस्य तद्वारणाय सत्यन्तम् । धावतोऽश्वात्पततीत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेत्विति । कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेऽपि तत्र विरुद्धमित्याह—**यस्मादश्वादिति** । [* तथा च पुरुषपतनहेतुक्रियानाश्रयत्वं न विरुद्धमिति भावः ।] तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयमिति भावः । एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह—**तस्यापीति** । उभयकर्मजविभागस्थले विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावात्परस्परस्मान्मेषावपसरत इति न स्यादित्याशङ्क्य समाधत्ते—**उभावपीति** । **मेषान्तरेति** । यथा निश्चलमेषादपसरद्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वं तथाऽत्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति । तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यम् । क्रिया चात्र धात्वर्थो न तु स्पन्दः । तेन वृक्षकर्मजविभागवति वस्त्रे वृक्षाद्वस्त्रं पततीति संगच्छते । वस्तुतो नैतावत्पञ्चम्या वाच्यम् । किं त्ववधेर्लक्षणमात्रं, द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गस्यासंभवेन वाच्यकोटौ प्रवेशस्य गौरवेणासंभवादिति तु प्रतिभाति । न चैवमपि वृक्षात्स्पन्दत इति स्यादिति शङ्क्यम् । आसनाच्चलितः, राज्याच्चलित इतिवदिष्टत्वात् । एतेन पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः । न चैवमपि वृक्षात्त्यजतीति दुर्वारम् । कर्मसंज्ञयाऽपादानसंज्ञाया बाधेन पञ्चम्यसंभवात् । भ्रमात्कृते तथा प्रयोगे यदि बोधाभावोऽनुभवसिद्ध-

---

* धनुश्चिह्नान्तर्गतग्रन्थः क. पुस्तक एव वर्तते ।

---

१ क. छ. 'र्मत्रे । वि' । २ ख. च. छ. 'स्परान्मे' । ३ क. ख च. छ. 'षमा' ।

स्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यजादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम् । बलाहकाद्विद्योतते विद्युदित्यादौ निःसृत्येत्यध्याहार्यम् । रूपं रसात्पृथगित्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम् । पृथग्विनेति पञ्चमी वा । इदं च—

" निर्दिष्टविषयं किंचिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते " ॥

इति वाक्यपदीयात्त्रिविधम् । यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम् । यथाऽश्वात्पतति । यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम् । यथा बलाहकाद्विद्योतते । निःसरणाङ्गे विद्योतने द्युतिर्वर्तते । अपेक्षिता क्रिया यत्र तदन्त्यम् । यथा कुतो भवान्पाटलिपुत्रात् । अत्राऽऽगमनमर्थमध्याहृत्यान्वयः कार्यः ॥

उद्देश्यश्चतुर्थ्यर्थः । तथा हि—संप्रदाने चतुर्थी । तच्च " कर्मणा यमभिप्रैति स संप्रदानम् " [पा० सू० १-४-३२] इतिसूत्रात्कर्मणा करणभूतेन यमभिप्रैतीप्सति तत्कारकं संप्रदानमित्यर्थकादुद्देश्यः । इदमेव शेषित्वम् । तदुद्देश्यकेच्छाविषयत्वं च शेषत्वमित्येव पूर्वतन्त्रे निरूपितम् । अत एव " प्रासनवन्मैत्रावरुणाय दण्डप्रदानम् " *इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं [⊙न प्रतिपत्तिः किं तु] चतुर्थीश्रुत्याऽर्थकर्मेति तत्र निर्णीतम् । रजकाय वस्त्रं ददातीत्यपि खण्डिकोपाध्यायः शिष्याय चपेटां ददातीतिभाष्योदाहरणादिष्टमेव । वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्संप्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्येवाऽऽहुः ।

इदं च—

" अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते संप्रदानताम् " ॥

इति वाक्यपदीयात्त्रिविधम् । सूर्यायार्घं ददातीत्याद्यम् । नात्र सूर्यः प्रार्थयते । नानुमन्यते । न निराकरोति । प्रेरकं विप्राय गां ददाति । अनुमन्तृ, उपाध्यायाय गां ददाति । अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः, विभक्तीनां धर्मिवाचकत्वात् । धर्ममात्रवाचकत्वे " कर्मणि द्वितीया " [पा० सू० २-३-२] इतिसूत्रस्वरसभङ्गापत्तेः । +कर्मार्थककृत्तद्धितादौ तथादर्शनाच्च । द्वितीयाद्यर्थकबहुव्रीहौ प्राप्तोदक इत्यादौ धर्मिवाचकतालाभाच्च । " सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम् " इति भाष्याच्चेति दिक् । आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता किं त्वाश्रयत्वमात्रं वाच्यं तदेव च तादात्म्येनावच्छेदकम् । करणतृतीयायाश्च व्यापारोऽपि

---

* चतुर्थाध्याये द्वितीयपादे षष्ठाधिकरणे । ⊙ धनुश्चिह्नान्तर्गतमधिकं छ. ज. पुस्तकयोः । + पक्वस्तण्डुल इत्यत्र ।

(नामार्थनिर्णयः)

पञ्चम्या विभागमात्रं चतुर्थ्या उद्देश्यत्वमात्रमत एवाऽऽकृत्यधिकरणमपि न विरुध्यत इत्यभिप्रेत्याऽऽह—**शक्तिरेव वेति** । षण्णामपीति शेषः । "षष्ठी शेषे" [पा० सू० २-३-५०] इति सूत्रात्तस्याः संबन्धमात्रं वाच्यम् । कारकषष्ठ्यास्तु शक्तिरेवेत्यूह्यम् । " सप्तमीपञ्चम्यौ कारकमध्ये " [पा० सू० २-३-७] इति सूत्रे शक्तिः कारकमिति पक्षस्य भाष्ये दर्शनात् । एवं च देवदत्तस्य गौर्ब्राह्मणाय गेहाद्गङ्गायां हस्तेन मया दीयत इत्यत्र देवदत्तसंबन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनको गङ्गाधिकरणको हस्तकरणको मन्निष्ठो व्यापार इति बोधः । **यथायथम्** । उक्तप्रकारेण । अत्र* मानमुपदर्शयन्घटं जानातीत्यादौ द्वितीयाया विषयतायां लक्षणेति बह्वाकुलं वदतो नैयायिकादीन्प्रत्याह—**सुपां कर्मेति** । अयं भावः—

" सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम् ।
प्रसिद्धो नियमस्तत्र+ नियमः प्रकृतेषु= वा " ॥

इति वार्तिकतद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः । तथा हि— "स्वौजसमौट्" [पा० सू० ४-१-२] " कर्मणि द्वितीया " [पा० सू० २-३-२] " द्व्येकयोर्द्विवचनैकवचने " [पा० सू० १-४-२२] इत्यादेः " लस्य " [पा० सू० ३-४-७७] " तिप्तस्झि " [पा० सू० ३-४-७८] " तान्येकवचनद्विवचन—" [१-४-१०२] इत्यादेरेकवाक्यतया कर्मादेस्तत्संख्यायाश्च वाच्यता लभ्यते । तथा तन्नियमश्च द्विविधो लभ्यते। द्वितीया कर्मण्येव तृतीया करण एवेत्येवमादिरर्थनियमः । कर्मणि द्वितीयैव करणे तृतीयैवेत्येवं शब्दनियमश्च । उभयथाऽपि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति याज्ञे कर्मणि "नानृतं वदेत् " इतिनिषेधविषयो भवत्येवेति स्वेच्छया लक्षणाऽपि विभक्तावप्रयोजिकैव । अत एव " विभक्तौ न लक्षणा " इत्यादिर्नैयायिकवृद्धानां व्यवहार इति दिक् ॥ १ ॥ (२४)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
सुबर्थनिर्णयः समाप्तः ॥

(अथ नामार्थनिर्णयः ।)

नामार्थानाह—

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥ १ ॥ (२५)

---

* सुपां कर्मादिवाचकत्वे । + सुप्तिङ्षु । = अर्थेषु ।

एकं जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात् । अनेकव्यक्तीनां वाच्यत्वे गौरवात् । न च व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः,*एवं ह्येकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम् । जात्या तु सहाऽऽश्रयत्वमेव संसर्ग इति लाघवम् । किं च विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्यायेन जातिरेव वाच्येति युक्तं, व्यक्तिबोधस्तु लक्षणया । एवं च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यत इति दिक् । यद्वा केवलव्यक्तिरेवैकशब्दार्थः । केवलव्यक्तिपक्ष एवाण्ग्रहणस्यैकशेषस्य चाऽऽरम्भेण तस्यापि शास्त्रसिद्धत्वात् । युक्तं चैतत् । +व्यवहारेण व्यक्तावेव तद्ग्रहणात् । =संबन्धितावच्छेदिकाया जातेरैक्याच्छक्तिरप्येकैवेति न गौरवमपि । न चैवं× घटत्वमपि वाच्यं स्याच्छक्यतावच्छेदकत्वात् । तथा च नागृहीतविशेषणन्यायात्तदेव वाच्यमस्त्विति शङ्क्यम् । अकारणत्वेऽपि कारणतावच्छेदकत्ववदलक्ष्यत्वेऽपि लक्ष्यतावच्छेदकत्ववत्तथाऽत्रापि संभवात् ।

उक्तं च—

" आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।
शब्दः सुकरसंबन्धो न च व्यभिचरिष्यति " इति ॥

वस्तुतस्तु " न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः" इति भाष्याद्विशिष्टं वाच्यम् । एकमित्यस्य चायमभिप्रायः—शक्तिज्ञाने विषयतयाऽवच्छेदिका जातिरेकैव । तथा च घटत्वविशिष्टबोधे घटत्वांशेऽन्याप्रकारकघटत्वशक्तिज्ञानत्वेन हेतुतेति कार्यकारणभाव इत्यादि प्रपञ्चितं भूषणे । तदेतदभिप्रेत्याऽऽह—द्विकमिति । जातिव्यक्ती इत्यर्थः । [+पूर्वपक्षविरोधपरीहारः पूर्ववत्] । त्रिकमिति । जातिव्यक्तिलिङ्गानीत्यर्थः । सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम् । आधिक्यं पुंस्त्वम् । ⌣अपचयः स्त्रीत्वम् । तत्तच्छब्दनिष्ठं तत्तद्वाच्यं च । तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते । केषांचिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात् । एवं च पदार्थपदे पुंस्त्वमेव व्यक्तिपदे स्त्रीत्वमेव वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैवायं पदार्थः, इयं व्यक्तिः, इदं वस्त्विति व्यवहारस्तटस्तटी तटमिति चोपपद्यते । तच्च लिङ्गमर्थपरिच्छेदकत्वेनान्वेतीति पश्वादिशब्दोक्तं [÷पशुस्त्रियां नास्तीति] पशुनेत्यादिविधिर्न च्छाग्यादीनङ्गत्वेन प्रयोजयतीति विभावनीयम् । न च व्यक्त्यादि-

---

* तत्पक्षेऽपि गौरवमेव बाधकमत आह—एवमिति । + गवानयनव्यवहारेण । = शक्तिग्रहे धर्मितावच्छेदकतया भासमानस्य । × व्यक्तिशक्तिवादपक्षेऽपीत्यर्थः । ÷ धनुश्चिह्नान्तर्गतं छ. ज. पुस्तकयोरेव । ⌣ न्यूनता । ÷ धनुश्चिह्नान्तर्गतग्रन्थस्थाने छ. पुस्तके " पशुना स्तौति " इति वर्तते ।

---

१ क. ख. ग. °च्छेदकस्य जा° ।

(नामार्थनिर्णयः)

शब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि *साधारण्यं शङ्क्यम्। व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा संभवेऽपि पशुशब्दस्य नित्यपुंलिङ्गत्वे प्रमाणाभावात्। "पश्वा न तायुं गुहा चरन्तम्" "पश्वे नृभ्यो यथा गवे" इत्यादि वेदे दर्शनाच्च। मीमांसायां चतुर्थे पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च। वस्तुतस्तु विशेषविध्यभाव उप्रत्ययान्तानां पुंस्त्वस्य व्याकरणे निर्णीतत्वाद्वेदभाष्येऽपि "जसादिषु च्छन्दसि वावचनम्" इति नामावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वनिर्णयात्। प्रकृते "छागो वा मन्त्रवर्णात्" इति न्यायेनैव निर्णयः। मन्त्रवर्णे हि च्छागस्य वपाया मेदस इति श्रूयते। तत्र च्छागस्येति च्छाग्यामसंभावितमिति भवति ततः पुंस्त्वनिर्णय इति विस्तरेण प्रपञ्चितं भूषणे। **चतुष्कं** संख्यासहितं त्रिकमित्यर्थः। **पञ्चकं** कारकसहितं चतुष्कमित्यर्थः। नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यम्। तत एव लिङ्गादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चेत्सत्यम्।+प्रत्ययवर्जिते दधि पश्येत्यादौ प्रत्ययमजानतोऽपि बोधात्प्रकृतेरेव वाचकत्वं कल्प्यते। लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्चेति। अत एवैषु पक्षेषु न निर्बन्धः। प्रत्ययस्यैव वाचकताया युक्तत्वात्। "द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः" इति वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात्। **शास्त्र** इति। बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुं प्राधान्येन सरूपसूत्रादौ व्यक्तम् ॥ १ ॥ (२९)

शब्दस्तावच्छाब्दबोधे भासते।

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते"

इत्याद्यानुभविकोक्तेः। "विष्णुमुच्चारय" इत्यादावर्थोच्चारणासंभवेन विना शब्दविषयं शाब्दबोधासंगतिश्चेति सोऽपि प्रातिपदिकार्थः। (†अयं भावः—) न च=लक्षणया निर्वाहः। निरूढलक्षणायाः शक्त्यनतिरेकात्। "जबगडदशमुच्चारय" इत्यादौ शक्याग्रहेण शक्यसंबन्धरूपलक्षणाया अग्रहाच्च। अज्ञातायाश्च वृत्तेरनुपयोगात्। "गाङ्गमुच्चारय" इत्यादिभाषाशब्दानामनुकरणे साधुतासंप्रतिपत्तेस्तेषां× शक्त्यभावेन परनये लक्षणाया असंभवाच्चेत्यभिप्रेत्य षोढाऽपि क्वचित्प्रातिपदिकार्थ इत्याह—

शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा।
नो चेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते ॥ २६ ॥

---

* स्वाश्रयपदवाच्यत्वसंबन्धेन स्त्रीपुंसवृत्तित्वम्। + वागादिशब्देऽपि। † धनुश्चिह्नान्तर्गतं क्वचिन्न दृश्यते। = स्ववाचकत्वरूपया। × अनुकरणानाम्।

(समासशक्तिनिर्णयः)

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः । यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद्भासते । अपिर्हेतौ । उपस्थितत्वाद्भासत इत्यर्थः । अयं भावः—अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात्तत्सिद्धये शक्तिरुपेया । शब्दार्थयोरभेदे प्रत्यक्षे विषयस्य हेतुत्वात्स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति । यद्यतिप्रसङ्गवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुस्तथाऽप्यत्राऽऽश्रयतया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः । निरूपकताश्रयतान्यतरसंबन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यत इत्यनवद्यम् । संबन्धस्योभयनिरूप्यत्वात्पदार्थस्येव +तद्बोधकत्वेन स्वस्यापि ज्ञानसंभवाच्चेति ।

उक्तं च वाक्यपदीये—

" ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते " इति ॥
" विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते " ।

इति चेति ॥ २ ॥ (२६)

प्रसङ्गादनुकार्यानुकरणयोरभेदपक्षे साधकमाह—

अत एव गवित्याह भू सत्तायामितीदृशम् ।
न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम् ॥ ३ ॥ (२७)

(इति भट्टोजिदीक्षितविरचितकारिकासु नामार्थनिर्णयः ।)

" गवित्ययमाह " " भू सत्तायाम् " इत्येवमादयो यतोऽनुकरणशब्दा अनुकार्यान्न भिद्यन्तेऽतस्तेषामर्थवत्त्वाद्यभावात् " अर्थवदधातुः " [पा० सू० १-२-४५] इत्याद्यप्रवृत्तौ न पदत्वं न वा प्रातिपदिकत्वम् । अथ च साधुत्वमित्युपपद्यते । अन्यथा " प्रत्ययः " [पा० सू० ३-१-१] " परश्च " । [पा० सू० ३-१-२] " अपदं न प्रयुञ्जीत " इति निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः ॥ ३ ॥ (२७)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
नामार्थनिर्णयः समाप्तः ॥

(अथ समासशक्तिनिर्णयः ।)

समासान्विभजते—

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ॥
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः ॥ १ ॥ (२८)

+ प्रत्यक्षात्मकशाब्दबोधजनकत्वेन ।

---

१ क. छ. 'दार्थस्ये'।

(समासशक्तिनिर्णयः)

सुपां सुपा, पदद्वयमपि सुबन्तम् । राजपुरुष इत्यादिः । **सुपां तिङा ।** पूर्वं पदं सुबन्तमुत्तरपदं तिङन्तम् । पर्यभूषत् । अनुव्यचलत् । " गतिमतोदात्तवता तिङाऽपि समासः " इति वार्तिकात्समासः । **सुपां नाम्ना ।** कुम्भकार इत्यादि । " उपपदमतिङ् " [पा० सू० २-२-१९] इति समासः । स च " गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः " इति परिभाषया भवति सुबुत्पत्तेः प्राक् । अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात् । अन्यथा चर्मक्रीतीत्यादौ नलोपानापत्तेः । **सुपां धातुना ।** उत्तरपदं धातुमात्रं न सुप्तिङन्तम् । कटप्रूः । आयतस्तूः । " क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च " इति वार्तिकात् । **तिङां तिङा ।** पिबतखादता पचतभृज्जतेत्यादिः । " आख्यातमाख्यातेन क्रियासातत्ये " इति मयूरव्यंसकाद्यन्तर्गणसूत्रात् । **तिङां सुबन्तेन ।** पूर्वपदं तिङन्तमुत्तरं सुबन्तम् । जहिस्तम्बः । " जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति " इति मयूरव्यंसकाद्यन्तर्गणसूत्रात् । अयं षड्विधोऽपि समासः " सह सुपा " [पा० सू० २ १-४] इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ ॥ १ ॥ (२८)

स्वयं भाष्यादिसिद्धं तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याव्याप्त्यतिव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं च दर्शयति—

समासस्तु चतुर्धेति प्रायोवादस्तथा परः ॥
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥
भौतपूर्व्यात्सोऽपि रेखागवयादिवदास्थितः ॥ २ ॥ (२९)

चतुर्धा, अव्ययीभावतत्पुरुषद्वंद्वबहुव्रीहिभेदात् । अयं प्रायोवादः । भूतपूर्वः, इदम्भूः । कारामूः, आयस्तूः, वागर्थाविवेत्याद्यसंग्रहात् । तथा पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वंद्वः, अन्यपदार्थप्रधानो बहुव्रीहिः, इत्यादिलक्षणमपि प्रायिकम् । उन्मत्तगङ्गम्, सूपप्रति, अर्धपिप्पली, द्वित्राः, शशकुशपलाशमित्यादौ परस्परव्यभिचारात् । तथा हि—उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः । अन्यपदार्थप्राधान्याद्बहुव्रीहिलक्षणातिव्याप्तिश्च । " अन्यपदार्थे च संज्ञायाम् " [पा० सू० २-१-२१] इति समासात् । सूपप्रतीत्यव्ययीभाव उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च । " सुप्प्रतिना मात्रार्थे " [पा० सू० २-१-९] इति समासः । अर्धपिप्पलीतितत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च । " अर्धं नपुंसकम् " [पा० सू० २-२-२] इति समासात् । एवं पूर्वकाय इत्यादौ द्रष्टव्यम् । द्वित्रा इति बहुव्रीहावुभयपदार्थप्राधान्याद्वंद्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्च । शशकुशपलाशमित्यादिद्वंद्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वंद्वाव्याप्तिश्च स्यादिति भावः ।

सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम् । असंभवश्चैषामित्याह—**भौतपूर्व्यादित्यादि** । रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपश्वलक्षणत्ववदेतेषामपि न समासलक्षणत्वम् । बोधकता तु तद्वदेव स्यादिति भावः ॥ २ ॥ (२९)

ननु पूर्वपदार्थप्राधान्यादि समासे सुवचनम् । तथा हि—" समर्थः पदविधिः " [पा० सू० २-१-१] इति सूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु जहत्स्वार्थाजहत्स्वार्थपक्षयोरेवैकार्थीभावव्यपेक्षारूपयोः पर्यवसानं लभ्यते । तत्राजहत्स्वार्थपक्ष उक्तव्यवस्थानासंभविनीत्याशङ्कां मनसिकृत्याऽऽह—

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ।
भेदः संसर्ग उभयं वेति वाच्यव्यवस्थिते ॥ ३ ॥ (३०)

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था । पदे वर्णवद्वृत्तौ पदानामानर्थक्यमित्यर्थः । अयं भावः—समासशक्त्यैव राजविशिष्टपुरुषभानसंभवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम्, वृषभयावकादिपदेषु वृषादिपदानामिव । *अन्यथा राजपदेन विग्रहवाक्य इव राज्ञः स्वातन्त्र्येणोपस्थितिसत्त्वादृद्धस्य राज्ञः पुरुष इत्यत्रैव ऋद्धस्य राजपुरुष इत्यस्याप्यापत्तेरिति । **अजहदिति** । न जहति पदानि स्वार्थं यस्यां साऽजहत्स्वार्था । अयमभिप्रायः—राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः कल्पकाभावात् । क्लृप्तराजादिपदादेवार्थोपस्थितिसंभवे तत्कल्पनस्य गौरवपराहतत्वाच्च । क्लृप्तशक्तित्यागोऽप्यप्रामाणिकः कल्प्येत । तथा चाऽऽकाङ्क्षादिवशात्क्लृप्तशक्त्यैव विशिष्टार्थबोधः । अयमेव व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः । न चात्र मते समास ऋद्धस्येतिविशेषणान्वयापत्तिः । " सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न " इति वार्तिकात् । तथा चैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वात्पूर्वपदार्थप्रधान इत्यादिव्यवस्था सूपपादेति भावः । प्रसङ्गाद्वृत्तिभेदमपि निरूपयति—**ते पुनरिति** । द्वे अपि वृत्ती त्रिविधे वाच्यत्रैविध्यात् । वाच्यमेवाऽऽह—**भेद इत्यादि** । भेदोऽन्योन्याभावः । तथा च राजपुरुष इत्यादावराजकीयभिन्न इति बोधः । अस्यावाच्यत्वे च राजपुरुषः सुन्दर इतिवद्राजपुरुषो देवदत्तस्य चेत्यापि स्यात् । वाच्यत्वे तद्विरोधान्नैवं प्रयोग इति भावः । राजसंबन्धवानित्येव शाब्दभानं भेदस्तूत्तरकालमुपतिष्ठत इत्याशयेनाऽऽह—**संसर्ग इति** । विनिगमनाविरहमस्वामिकेऽपि राजपुरुष इत्यादिप्रयोगापत्तिं च मनसि कृत्वोभयं वाच्यमित्याह—**उभयं वेति** । तथा चाराजकीयभिन्नो राजसंबन्धवांश्चायमिति बोधः ॥ ३ ॥ (३०)

---

* वृत्तौ व्यपेक्षारूपसामर्थ्यावगमे ।

---

१ छ. 'स्थितम् । ज'

व्यपेक्षावादस्यैव युक्तिभाष्यविरुद्धत्वात्तन्मूलकः पूर्वपदार्थप्रधान इत्याद्युत्सर्गोऽप्ययुक्तः । किं तु रेखागवयन्यायेनोत्सर्गोऽपि परम्परयैव बोधक इत्याशयेन समाधत्ते—

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।
बहूनां वृत्तिधर्माणां वचनैरेव साधने ॥
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ॥ ४ ॥ (३१)

समास इति वृत्तिमात्रोपलक्षणम् । " समर्थः पदविधिः " [पा० सू० २-१-१] इत्यत्र पदमुद्दिश्य यो विधीयते समासादिः स समर्थः, विग्रहवाक्याभिधाने शक्तः सन्साधुरिति सूत्रार्थस्य भाष्यालाभात् । पदोद्देश्यकविधित्वं च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव । शक्त्यस्वीकर्तॄणां व्यपेक्षावादिनां मते दूषणं शक्तिसाधकमेवेत्याशयेनाऽऽह—**पङ्कजशब्दवादिति** । पङ्कजनिकर्तुरपि योगादेर्वोपस्थितौ *तत्रापि समुदायशक्तिर्न सिध्येत् । न च पद्मत्वरूपेणोपस्थितये तत्कल्प्यत इति वाच्यम् । चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये +तत्कल्पनावश्यकत्वात् । लक्षणयैव ×तथोपस्थितिरिति चेत्पङ्कजपदेऽपि =सा सुवचा । ÷एवं रथकारपदेऽपि । तथा च " वर्षासु रथकारोऽग्निमादधीत " इत्यत्रापि विना लक्षणां कृप्तयोगेन ब्राह्मणादिविषयतयैवोपपत्तौ ⌣तत्कल्पनां कृत्वा ⊙जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्वविद्याकल्पनमप्ययुक्तं स्यादिति भावः । साधकान्तरमाह—**बहूनामिति** । वृत्तेर्धर्मा विशेषणलिङ्गसंख्याद्ययोगादयस्तेषां वचनैः साधने गौरवमित्यर्थः । अयं भावः—विशिष्टशक्त्यस्वीकारे राज्ञः पुरुष इत्यत्रेव राजपुरुष इत्यत्रापि स्याद्विशेषणाद्यन्वयः, राजपदेन स्वतन्त्रोपस्थितिसत्त्वात्, विभाषावचनं च समासनियमवारणाय† कार्यम् । ननु " सविशेषणानाम् " इति वचनान्न विशेषणाद्यन्वयः । विभाषावचनं च कृतमेवेत्याशङ्कां समाधत्ते—**वचनैरेवेति** । न्यायसिद्धमेव सूत्रम् । व्यपेक्षाविवक्षायां वाक्यस्यैकार्थीभावे समासस्येति स्वभावत एव प्रयोगनियमसंभवात् । सविशेषणेत्यपि विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयाऽन्वयासंभवान्न्यायसिद्धमिति भावः । ‡अत एव व्यपेक्षापक्षमुत्थाप्य " अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्यः " इति भाष्यकारेण दूषणमप्युक्तम् ॥ ४ ॥ (३१)

तथा धवखदिरौ निष्कौशाम्बिर्गोरथो घृतघटो गुडधानाः केशचूडः सुवर्णालंकारो

---

* पङ्कजपदेऽपि । + तच्छब्देन रूढिः । × विशिष्टशक्त्युपस्थितिः । = लक्षणा । ÷ विशिष्टशक्त्यनभ्युपगमे । ⌣ तत्र रूढिमुपगम्य । ⊙ प्रतिलोमजातीयस्य । † न तु शक्तिविकल्पार्थम् । ‡ व्यपेक्षावादस्याऽऽपातरमणीयत्वात् ।

---

१ क. ज. °क्यार्थाभि° । २ छ. °व । विशिष्टश° ।

द्विदशाः सप्तपर्ण इत्यादावितरेतरयोगातिक्रान्तयुक्तपूर्णमिश्रसंघातविकारसुच्प्रत्ययलोपो वीप्साद्यर्थो वाचनिको वाच्य इत्यतिगौरवं स्यादिति दूषणान्तरमाह—

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् ॥
कर्तव्यं ते न्यायसिद्धं त्वस्माकं तादिति स्थितिः ॥ ५ ॥ (३२)

आदिना घनश्यामः, हंसगमनः, इत्यादाविवादीनां पूर्वोक्तानां च संग्रहः। दूषणान्तरमाह—**बहुव्युत्पत्तिभञ्जनमिति** । अयमाशयः—चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा। न च *तत्र लक्षणा । प्राप्तोदको ग्राम इत्यादौ +तदसंभवात्। $प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तत्संबन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थलाभात्। प्राप्तेतिक्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्तर्हि ¶समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मेति स्यात् । †अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः। प्राप्तेर्धात्वर्थतया कर्तृतासंबन्धेन भेदेनोदकस्य तत्रान्वयासंभवाच्च। अन्यथा देवदत्तः पच्यत इत्यत्र कर्तृतासंबन्धेन देवदत्तस्यान्वयसंभवेनानन्वयानापत्तेः । अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्संबन्धिग्रामो लक्ष्यत इति चेन्न । प्राप्तेर्धात्वर्थतया क्तार्थकर्तरि विशेष्यताया असंभवात्। प्रकृतिप्रत्ययोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तेः । प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च । एवमूढरथः, उपहृतपशुः, उद्धृतौदना, बहुपाचिकेत्यादावपि द्रष्टव्यम्। अत्र हि रथकर्मकवहनकर्ता, पशुकर्मकोपहरणोद्देश्यः, ओदनकर्मकोद्धरणावधिः, बहुपाककर्त्रधिकरणम्, इति बोधाभ्युपगमात्। अतिरिक्तवृत्तिपक्षे च घटत्वविशिष्टे घटपदस्येवोदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वाह इति भावः ॥ ५ ॥ (३२)

साधकान्तरमाह—

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना ॥
कृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः ॥ ६ ॥ (३३)

अयं भावः—चित्रगुरित्यादिषु चित्रगोः स्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते। न च ×तत्र लक्षणा। सा हि न चित्रपदे । चित्रस्वामी गौरितिबोधापत्तेः। नापि गोपदे। गोः स्वामी चित्र इत्यन्वयबोधापत्तेः । चित्रादिमात्रस्यै लक्ष्यैकदेशत्वेन तत्र

---

* स्वामिनि वाक्यस्येति शेषः । + वाक्यलक्षणयाऽप्यभीप्सितार्थबोधानिर्वाहादिति भावः। $ तदेव विशदयति—प्राप्तीति । ¶ तत्त्वं समानविभाक्तिकत्वम्। † भेदाङ्गीकारे। × समुदायघटकपूर्वोत्तरपदयोरित्यर्थः।

---

१ ख. ग. घ. ङ. °गादिका°। च. °गान्निष्का°। २ छ. ज. °क्तशक्तिप°। ३ क. ज. °स्य लक्षणायां ल°।

गवादेरन्वयायोगात् । न च चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यत इति वाच्यम् । गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासंभवात् । न च गोपदे साक्षात्संबन्ध एव विनिगमक इति वाच्यम् । एवमपि प्राप्तोदकः कृतविश्व इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः । यौगिकानां कर्त्रर्थकतया[1] साक्षात्संबन्धाविशेषात् । न च पदद्वये लक्षणेति नैयायिकोक्तं युक्तम् । बोधावृत्तिप्रसङ्गात् । न च परस्परं तात्पर्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयोरिति न बोधावृत्तिरिति वाच्यम् । एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असंभवात् । न च चरमपद एव सा प्रत्ययार्थान्वयानुरोधात्, प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम् । *एवं हि बहुव्रीह्यसंभवापत्तेः । अनेकमन्यपदार्थे " [पा० सू० २-२-४] इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे तद्विधानात् । किं चैवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात् । पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोगसंभवात् । एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेदत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र+ विस्तरः । एवं चाषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना, उक्तयुक्तेः, अगत्या शक्त्यन्तरकल्पना । क्लृप्तत्यागः, क्लृप्तशक्त्योपपत्तिरिति =व्युत्पत्तित्यागश्च **तवास्ति तर्हि** सर्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः । यत्तु व्यपेक्षावादिनो **नैयायिकमीमांसकादयः**— न समासे शक्तिः । राजपुरुष इत्यादौ राजपदादेः संबन्धिलक्षणयैव राजसंबन्ध्यभिन्नः पुरुष इति बोधोपपत्तेः । अत एव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादिविशेषणान्वयः । न वा घनश्यामो निष्कौशाम्बिर्गोरथ इत्यादाविवादिप्रयोगापत्तिः । उक्तार्थतयेवक्रान्तादिपदप्रयोगासंभवात् । न वा " विभाषा " [पा० सू० २-१-११] इतिसूत्रावश्यकत्वम् । लक्षणया राजसंबन्ध्यभिन्न इति बुबोधयिषायां समासस्य राजसंबन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसंभवात् । नापि षड्कजपदप्रतिबन्दी शक्तिसाधिका । तत्रावयवशक्तिमजानतोऽपि बोधात् । न च शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः संभवति । अत एव राजादिपदशक्त्यग्रहे राजपुरुषश्चित्रगुरित्यादौ न बोधः । नापि चित्रगुरित्यादौ लक्षणासंभवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असंभवः । बहुव्युत्पत्तिभङ्गनापत्तेरिति वाच्यम् । प्राप्तोदक इत्यादावुदकपद एव लक्षणास्वीकारात् । पूर्वपदस्य यौगिकत्वेन तल्लक्षणया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात् । प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते विशि-

---

* उत्तरपदस्य लक्षकत्वे । + भूषणे । = प्रकृतिप्रत्ययययोरितिव्युत्पत्तित्यागः ।

---

[1] ङ. छ. ज. कर्त्राद्यर्थ° ।

ष्टस्यैव सङ्केततत्वात् । बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् । प्रकृते चात्यन्तसंनिधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपद एव सा कल्प्यत इति विशेषः । स्वीकृतं च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकंमन्यैरित्याहुः । अत्रोच्यते—समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात् । अर्थवत्त्वालाभेन " अर्थवदधातुरप्रत्ययः प्रातिपदिकम् " [पा० सू० १-२-४५] इत्यस्याप्रवृत्तेः । न च " कृत्तद्धितसमासाश्च " [पा० सू० १-२-४६] इत्यत्र समासग्रहणात्सा । तस्य नियमार्थताया भाष्यसिद्धाया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् । समासवाक्ये शक्त्यभावेन शक्यसंबन्धरूपलक्षणाया अप्यसंभवेन लाक्षणिकार्थवत्त्वस्याप्यसंभवात् । अथ " तिप्तस् " इत्यारभ्य ङ्योस्सुप् " इति तिप्प्रत्याहारो भाष्यसिद्धः । तमादायातिप्प्रातिपदिकमित्येव सूत्र्यताम् , कृतमर्थवदादिसूत्रद्वयेन, समासग्रहणं च नियमार्थमस्तु, तथा चातिप्तिबन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथाऽपि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन *समासाव्याप्तितादवस्थ्यमेव । तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति धूम इव वह्निम् । किं चैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः । विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् । यत्तु संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति तन्न । उपकुम्भमधिप्पलीत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । न च तत्रापि संनिधानमेव । आनुशासनिकसंनिधेर्विवक्षितत्वात् । तथा च यत्पदोत्तरं याऽनुशिष्टा सा तदर्थगतं स्वार्थं बोधयति । समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम् । अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरमेव विभक्त्यनुशासनात् । अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत्तर्हि पङ्कजमानय दण्डिनं पश्य शूलिनं पूजयेत्यादौ पङ्कदण्डशूलेष्वानयनदर्शनपूजनादेरन्वयप्रसङ्गः । अघटानानयेत्यत्र घटेऽप्यानयनान्वयापत्तेश्च । न च दण्डादीनां विशेषणतया न तत्राऽऽनयनाद्यन्वयः । पाकान्नीलः, धर्मात्सुखीत्यादौ पाकधर्मादिजन्यताया रूपसुखादावनन्वयप्रसङ्गात् । यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति, तन्न । घटं पश्येत्यत्र घटपदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्याऽऽवश्यकत्वात् । अथ प्रत्ययप्राग्वर्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेन्न । गामानयति कृष्णो दण्डेनेत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात् । अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेत्तन्न । अकृप्तकल्पनां कृप्तव्युत्पत्तित्यागं चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्त-

* अर्थवत्त्वाभावादिति भावः । + अथ प्रत्ययानां प्रकृत्यर्थगतस्यार्थबोधकत्वम् ।

१ च. °था च सुप्तिङन्तं° । २ ङ. छ. ज. °संज्ञात् । अ° ।

त्वादिति दिक् । अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषश्चित्रगुर्नीलोत्पलमित्यादौ सर्वत्रानन्वयप्रसङ्गः । राजपदादेः संबन्धिनि लक्षणायामपि तण्डुलः पचतीत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुतायां आवश्यकत्वात्पुरुषादेस्तथात्वाभावात् । *तण्डुलः शुभ्र इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेस्तस्य च शुक्लेऽभेदेनैवान्वयः । +शुभ्रेण तण्डुलेनेत्यादौ च विशेषणविभक्तिरभेदार्था पार्ष्णिको वाऽन्वय इति नातिप्रसङ्गः । तथा च समासे परस्परमन्वयासंभवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः । किं च राजपुरुष इत्यादेः संबन्धिनि संबन्धे वा लक्षणा । नाऽऽद्यः । राज्ञः पुरुष इतिविवरणविरोधात्समाससमानार्थकवाक्यस्यैव विग्रहत्वात् । अन्यथा ·।·तस्माच्छक्तिनिर्णयो न स्यात् । नान्त्यः । राजसंबन्धरूपः पुरुष इतिबोधप्रसङ्गात् । विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे । अत एव " वषट्कर्तुः प्रथमभक्षः " इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तमेकप्रसरत्वभङ्गापत्तेरिति))तृतीये । "व्यङ्गैः स्विष्टकृतं यजति" इत्यत्राङ्गानुवादेन त्रित्वविधानं न युक्तम्† । एकप्रसरताभङ्गापत्तेरिति दशमे× च निरूपितं संगच्छते । संगच्छते चारुणाधिकरणारम्भः । अन्यथा " अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति " इत्यत्रारुणपदवदितरयोरप्येकाब्दत्वादिगुणमात्रवाचकतयाऽमूर्तत्वात्क्रीणातौ करणत्वासंभवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्भेदशङ्काया असंभवादिति प्रपञ्चितं भूषणे । तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः ॥ ६ ॥ (३३)

राजपुरुष इत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः । चित्रगुरित्यादौ च चित्राणां गवामयमित्येव, समानार्थत्वानुरोधात् । यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति " शेषो बहुव्रीहिः " [पा० सू० २-२-२३] इति सूत्राल्लभ्यत इति प्रथमान्तं पक्षे वाक्यं चित्रा गावो यस्येत्येवं संभवत्येव, " षष्ठी " [पा० सू० २-२-९] इति समासविधानाद्राज्ञः पुरुष इति पक्षे वाक्यं तथाऽपि तस्य न विग्रहत्वं भिन्नार्थत्वात् । किं तूक्तस्यैवेति मीमांसकाः । तान्प्रसङ्गान्निरस्यति—

आख्यातं तद्धितकृतोर्यत्किंचिदुपदर्शकम् ॥
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः ॥ ७ ॥ (३४)

---

* पूर्वोक्तस्यात्र व्यभिचारोऽतस्तण्डुल इति । + तद्वदत्रापि व्यभिचारोऽत आह—शुभ्रेति । ·।· विग्रहवाक्यात् ।))पञ्चमपादे दशमाधिकरणे । † अत्रापि समाससत्त्वादिति भावः । × सप्तमपादे तृतीयाधिकरणे ।

---

१ च. °प्रसङ्गत्व° । २ ङ. °रताभ° ।

तद्धितकृतोर्यत्किंचिदर्थबोधकं विवरणमाख्यातं तत्र विपर्ययो दृष्टः । तथा हि—आक्षिकः कुम्भकार इत्यत्राक्षकरणकव्यापाराश्रयः, कुम्भानुकूलव्यापाराश्रय इति बोधः । अक्षैर्दीव्यति कुम्भं करोतीत्यत्राक्षकरणिका देवनानुकूला भावना, कुम्भोत्पत्त्यनुकूला भावनेति बोधः । कृत्प्रत्यये कारकाणामाख्याते भावनायाः प्राधान्यं वदतो मीमांसकस्यापीति गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य चित्रा गावो यस्येत्यादेर्विग्रहत्वे बाधकमस्तीति भावः ॥ ७ ॥ (३४ ॥

नन्वस्तूक्तरीत्या सर्वत्र समासे शक्तिरस्तु च तथा विग्रहस्तथाऽपि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषान्निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यादित्यत आह—

पर्यवस्यच्छाब्दबोधाददूरप्राक्षणस्थितेः ॥
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ॥ ८ ॥ (३५)

(इति भट्टोजिदीक्षितविरचितकारिकासु समासशक्तिनिरूपणम् ।)

पर्यवस्यंश्चासौ शाब्दबोधश्च तस्मादददूरश्चासौ प्राक्षणश्च तदानींतनलाघवमादायाधिकरणाविरोध इत्यर्थः । अयं भावः—*निषादस्थपतिपदं समासशक्तिपक्षे निषादरूपे निषादानां च स्थपतौ निषादस्वामिके पुरुषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थकम् । तथा च " नानार्थे तात्पर्याद्विशेषावगतिः " इति न्यायेन तत्कल्पनायां पदद्वये पूर्वोपस्थितार्थ एवोपस्थित्यादिलाघवात्तत्कल्प्यत इति । परेषामपि सति तात्पर्ये यष्टीः प्रवेशयेतिवल्लक्षणाया दुर्वारत्वात्तात्पर्यमेव कल्प्यकोटावविशिष्यत इति दिक्॥८॥(३५)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे समासशक्तिनिरूपणं समाप्तम् ।

(अथ शक्तिनिर्णयः ।)

शक्तिप्रसङ्गात्तस्याः स्वरूपमाह—

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा ॥ १ ॥ (३६)

इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामप्यर्थैः सह तद्बोधकारणतैव योग्यता सैव शक्तिरित्यर्थः । ननु न बोधकारणत्वमनादिभूतं शक्तिः, आधुनिकदेवदत्तादिपदे तदभावात् ।

---

* स्थपतिशब्दः स्वामिपर्यायः ।

---

१ छ. कुम्भोत्पत्त्यनु° ।

(शक्तिनिर्णयः)

अन्यथा पित्रादिसङ्केताज्ञानेऽप्यन्वयबोधप्रसङ्गः । लाक्षणिकातिव्याप्तेश्चेति सङ्केतज्ञानमपि हेतुर्वाच्यम् । तथा चाऽऽवश्यकत्वात्स *एव शक्तिरस्तु, स चाऽऽधुनिके पित्रादेर्गवादौ चेश्वरस्येति चेदत्रोच्यते । सङ्केतो न ÷स्वरूपेण हेतुः, =अगृहीतशक्तिकादर्थबोधप्रसङ्गात् । नापि सामान्यतो ज्ञातः, प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात् । नापि सङ्केतत्वेन तज्ज्ञानं हेतुः, गवादिपदेष्वीश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां +लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधेन[1] व्यभिचारात् । न चार्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं हेतुस्ततोऽपि लाघवेनार्थधीजनकत्वेनैव हेतुतायाम†स्मत्पक्षसिद्धेः । न चाऽऽधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः । तत्रापीदं पदमेनमर्थं बोधयत्वितीच्छाग्रहे पदे तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात् । न च स्वातन्त्र्येण[2] अर्थबोधकताज्ञानं कारणं वाच्यमन्यथा नेदं तद्धीजनकमिति[3] जानतोऽस्माच्छब्दादयमर्थो बुद्धोऽनेनेति जानतस्तद्ग्रहापत्तेरिति वाच्यम् । नेदं तद्धीजनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासंभवात् । अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति । इदं चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानाद्गृह्यतेऽतस्तज्ज्ञानात्पूर्वं न बोधः । नापि लाक्षणिकोच्छेदापत्तिरिष्टत्वाच्छक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारण्यात्[4]। किं च प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधानङ्गत्वात्। शाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम् । तथा च कार्यकारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव हेतुतेति लाघवम् । अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः । शक्तिजन्योपस्थितिं विनाऽपि लक्षणाजन्योऽपि स्थितितः[5] शाब्दबोधात् । न चाव्यवहितोत्तरत्वसंबन्धेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकं तत्तदुपस्थितित्वं च कारणतावच्छेदकम्, अनन्तकार्यकारणभावप्रसङ्गात् । किं च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणा ज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवं च प्राग्वदेव द्रष्टव्यम् । न चेदं पदमेतदर्थबोधकमिति शक्तिज्ञानकार्यकारणभावकल्पनेऽपि तत्तदर्थभेदेनानेककार्यकारणभावकल्पनेऽपि गौरवं तवापि समानम्, परस्परव्यभिचारवारणायाव्यवहितोत्तरत्ववटितत्वे च सुतरामिति वाच्यम् । शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्यकारणभावानन्त्यस्य तवापि साम्यात् । लक्षणाकार्यकारणभावकल्पनागौरवं परं तवातिरिच्यते । अथ वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुना वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया

---

* सङ्केत एव । ÷ सङ्केतत्वेनेत्यर्थः । = अज्ञातसङ्केतात् । + वैदिकानां कथंचिदीश्वरबोधसंभवाल्लौकिकेति । † वैयाकरणपक्षसिद्धेः ।

---

१ ज. बोधनेन । २ ङ. च. छ. °न्त्र्येण बो° । ३ ज. °ति ज्ञानवतोऽप्यस्मा° । ४ ज. °लक्षणासा° । ५ ज. °तिवतः ।

वाच्यमिति चेन्न । शक्तिलक्षणान्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वात् । शक्तित्वमपेक्ष्य गौरवाच्छाब्दबोधहेतुतावच्छेदकस्य पदार्थोपस्थितिवृत्तेरज्ञाने तद्घटितकार्यकारणभावग्रहस्यासंभवात् । अथ ममापि शक्तिज्ञानत्वेनैव हेतुता शक्यसंबन्धरूपलक्षणायां शक्तेरपि प्रवेशादिति चेन्न । शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वस्याऽऽवश्यकत्वात् । अन्यथा गङ्गातीरयोः संबन्धाग्रहवतो गङ्गापदशक्तिं जानतोऽपि गङ्गायां घोष इति वाक्यात्तीरबोधप्रसङ्गः । शक्तिज्ञानस्य हेतोः सत्त्वात् । अपि च घटमानयेति वाक्यं हस्तिनं च स्मरतो घटपदादिभ्यो घटादेर्गजाद्धस्तिपकस्य च समूहालम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः । समूहालम्बनरूपायां पदार्थोपस्थितौ[1] वृत्तिजन्य[त्व?]सत्त्वात् । तथा च विषयतया शाब्दबोधं प्रति तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यम् । एवं च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसंभवदुक्तिकमिति । एतेन शक्तिप्रयोज्यैवोपस्थितिर्हेतुरिति न लक्षणा ज्ञानकार्यकारणभावान्तरं ममापीति परास्तम् । प्रयोज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वाच्चेत्यादिकं विस्तरेण प्रपञ्चितं भूषणे ॥ १ ॥ (३६)

नन्वेवं भाषादितो बोधदर्शनाद्बोधकतारूपा शक्तिस्तत्रापि स्यात् । तथा च साधुताऽपि स्यात् । शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते—

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ॥
वाचकत्वाविशेषे च नियमः पुण्यपापयोः ॥ २ ॥ (३७)

असाधुर्गाव्यादिः । अनुमानेन साधुशब्दमनुमाय **वाचको** बोधकः **कैश्चिदिष्यते** । तथा च लिपिवत्तेषां साधुस्मरण एवोपयोगो न तु साक्षात्तद्वाचकत्वमतो न साधुत्वमिति भावः ।

उक्तं हि वाक्यपदीये—

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ।
न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।
न यतः स्मृतिमात्रेण[2] तस्मात्साक्षादवाचकाः ।
अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ।

---

१ छ. °तौ पदजन्यत्वस° । २ ङ. छ. ज्ञाने का° । ३ च° °षेण नि° । ४ च. छ. °तिशास्त्रेण ।

(शक्तिनिर्णयः)

" एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते " इति ॥

नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानं शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत् । सत्यम् । तत्तद्देशभेदभिन्नेषु तेषु शक्तिकल्पने गौरवात् । न च पर्यायतुल्यता शङ्क्या तेषां सर्वदेशेष्वेकत्वाद्विनिगमनाविरहेण सर्वत्र शक्तिकल्पना । न ह्यपभ्रंशे तथा । अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च । एवं शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतेनैव द्रष्टव्यम् । इदानीं स्वमतमाह—**वाचकत्वाविशेषे चेति** । अयं भावः—अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् । न च साधुस्मरणात्ततो बोधस्तानविदुषां पामराणामपि बोधात्तेषां साधोरबोधाच्च । न च शक्तिभ्रमात्तेभ्यो बोधो बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात् । ईश्वरेच्छा शक्तिरिति मतेऽपि सन्मात्रविषयिण्यास्तस्या बाधाभावात् । शक्तेः पदार्थपदविशेषघटिताया भ्रमासंभवाच्चेति ।

उक्तं च वाक्यपदीये—

" पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येन तेषां साधुरवाचकः ॥
दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः ।
*अनित्यदर्शिनां त्वस्मिन्वादे·।· बुद्धिविपर्ययः " इति ॥

अवाचकोऽबोधकः, बुद्धिविपर्यय एत एव वाचका नान्य इति विपर्यय इत्यर्थः । किं च विनिगमनाविरहाद्भाषायामपि शक्तिः । न च तासां नानात्वं दोषः । संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात् । किं चानुपूर्वी पदेऽवच्छेदिका सा च पर्यायेष्विव भाषायामप्यन्याऽन्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः । तथा च संस्कृतवद्भाषाशब्दाः शक्ता एव । न च पर्यायतया भाषाणां गणनापत्तिः साधूनामेव कोशादौ विभागाभिधानात् । नन्वेवं साधुता तेषां स्यादित्यत आह—**नियम इति** । पुण्यजननबोधनाय साधूनां साधुभिर्भाषितव्यमिति विधिः, पापजननबोधनाय नासाधुभिरिति निषेधः । तथा च पुण्यजननयोग्यत्वं साधुत्वम् । पापजननयोग्यत्वमसाधुत्वम् । तत्र जनकतावच्छेदिका च जातिस्तज्ज्ञापकं च कोशादि व्याकरणादि च । एवमेव राजसूयादेर्ब्राह्मणे फलाजनकत्ववद्ध्रुवादिशब्दानां नाश्वादौ साधुत्वमिति संगच्छते । आधुनिकदेवदत्तादिनाम्नामपि ध्रुवक्षरमित्यादिभाष्येण व्युत्पादितत्वात्साधुत्वमेवं च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्रैव

* शब्दानित्यत्ववादिनाम् । ·।· शक्तिविचारे ।

१ ज.°णात्तेषां बो° ।

साधुरिति पर्यवसितम् । गौणानां गणे व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेवाऽऽधुनिकलाक्षणिकानां त्वसाधुत्वमिष्टमेव । अत एव ब्राह्मणाय देहीत्यर्थे ब्राह्मणं देहीत्यादिकं लक्षणयाऽप्यसाध्वित्यादि विस्तरेण प्रपञ्चितं भूषणे ॥ २ ॥ (३७)

अतिरिक्तशक्तिग्रहोपायमाह—

संबन्धशब्दे संबन्धो योग्यतां प्रति योग्यता ।
समयाद्योग्यता संविन्मातापित्रादियोग्यवत् ॥ ३ ॥ (३८)

(इति भट्टोजिदीक्षितविरचितकारिकासु शक्तिनिर्णयः ।)

संबन्धो विषयः । **योग्यतां प्रति योग्यता** । संबन्धिशब्दं प्रति योग्यता विषय इति **समयाद्व्यवहारात्** । **योग्यता** संविच्छक्तिग्रहः, घटपदमत्र योग्यमेतत्संबन्धीति व्यवहारात्सा ग्राह्येत्यर्थः ॥ ३ ॥ (३८)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
शक्तिनिर्णयः समाप्तः ॥

(अथ नञर्थनिर्णयः ।)

नञर्थमाह—

नञ्समासे चापरस्य प्राधान्यात्सर्वनामता ।
आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्य(सर्वोऽ)तिसर्ववत् ॥१॥(३९)

नञ्समासेऽपरस्योत्तरपदार्थस्य[२] **प्राधान्यात्सर्वनामता** सिध्यतीति शेषः । अत एवाऽऽरोपितत्वमेव नञ्द्योत्यमित्यभ्युपेयमिति शेषः । अयं भावः—असर्व इत्यादावारोपितः सर्व इत्यर्थात्सर्वशब्दस्य प्राधान्याबाधात्सर्वनामता सिध्यति । अन्यथाऽतिसर्व इत्यत्रेव सा न स्यात् । घटो नास्तीत्यादावभावविषयकबोधे तस्य विशेष्यताया एव दर्शनात् । अस्मद्रीत्या च स आर्थो बोधो मानसः । तथा चासर्वस्मा इत्याद्यसिद्धिप्रसङ्ग इति । अत्र चाऽऽरोपितत्वमारोपविषयत्वम्, आरोपमात्रमर्थो विषयत्वं तु संसर्ग इति निष्कर्षः । द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य ॥ ३९ ॥

घटो नास्ति अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्पक्षान्तरमाह—

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम् ॥ २ ॥ (४०)

तदर्थो नञर्थः । अर्थपदं द्योत्यत्ववाच्यत्वपक्षयोः साधारण्येन कीर्तनाय । **भाष्य-**

---

१ छ. °बन्धिश° । २ ज. °र्थनिर्णयस्य ।

स्येति । तथा च नञ्सूत्रे महाभाष्यम्—निवृत्तपदार्थक इति । निवृत्तं पदार्थो यस्य नपुंसके भावे क्त इति क्तोऽभावार्थक इत्यर्थः । यत्तु निवृत्तः पदार्थो यस्मिन्नित्यर्थः । सादृश्यादिनाऽध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ इति कैयटः । तन्न, आरोपितब्राह्मण्यस्य क्षत्रियादेर्नञ्वाच्यत्वात् । अन्यथा सादृश्यादेरपि वाच्यतापत्तेः ।

यत्तु—

" तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः " ॥

इति पठित्वाऽब्राह्मणोऽपापमनश्चोऽनुदरा कन्याऽपशवो वा अन्ये गोअश्वेभ्योऽधर्म इत्युदाहरन्ति, तत्तु आर्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र । **विशेषणमिति** । प्रतियोगिनीति शेषः । तथा चासर्वपदे सर्वनामसंज्ञा । " अनेकमन्यपदार्थे " [पा० सू० २-२-२४] " सेव्यतेऽनेकया संनतापाङ्गया " इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः । अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वम् । अत्वं भवसि अनहं भवामीत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते । अन्यथा त्वदभावो मदभाव इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्क्ष्वसत्त्वात्पुरुषव्यवस्था न स्यात् । अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः । **विशेष्यो वेति** । प्रतियोगिनीति शेषः । अयं भावः—गौणत्वेऽपि नञ्समासे "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि " [पा० सू० ६-१-१३२] इति ज्ञापकात्सर्वनामसंज्ञा नानुपपन्ना । असः शिव इत्यत्र सुलोपवारणायानञ्समास इति हि विशेषणम् । न च तत्र तच्छब्दस्य सर्वनामताऽस्ति गौणत्वात् । अकोरित्यकच्सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात् । तथा चानञ्समास इति ज्ञापकं सुवचमनेकमन्यपदार्थ इत्यादावेकवचनं विशेष्यानुरोधात् । " सुबामन्त्रिते परासङ्गवत्स्वरे " [पा० सू० २-१-२] इत्यतोऽनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव । किं चानेकशब्दाद्विवचनोपादाने बहूनां बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिध्येदित्युभयसंग्रहायैकवचनं जात्यभिप्रायमौत्सर्गिकं वा, सेव्यतेऽनेकयेत्यत्रापि योषयेतिविशेष्यानुरोधात्प्रत्येकं सेवनान्वयबोधनाय चैकवचनं न तूत्तरपदार्थप्राधान्यप्रयुक्तम् । अत एव पतन्त्यनेके जलधेरिवोर्मय इत्यादिकमपि सूपपादम् । अत्वं भवसीत्यादौ युष्मदस्मदोस्तद्भिन्ने लक्षणा । नञ् द्योतकः । तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात्पुरुषव्यवस्था । त्वद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः । एवं न त्वं पचसीत्यत्र त्वदभिन्नाश्रयकपाकानुकूलभावनाभावः । घटो नास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः । असमस्तनञः क्रिया-

यामेवान्वयबोधात् । स चाभावोऽत्यन्ताभावत्वान्योन्याभावत्वादिरूपेण शक्यस्तत्तद्रूपेण बोधादित्यन्यत्र विस्तरः ॥ २ ॥ (४०)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
नञर्थनिर्णयः समाप्तः ॥

(अथ निपातद्योतकत्वनिर्णयः ।)

प्रादयो द्योतकाश्चादयो वाचका इति नैयायिकमतमयुक्तं वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते—

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।
उपास्येते हरिहरौ लकारो दृश्यते यथा ॥ १ ॥ (४१)

येन हेतुना **प्रादयो द्योतकास्तेनैव** हेतुना **चादयो निपातास्तथा** द्योतका इत्यर्थः । अयं भावः—ईश्वरमनुभवतीत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः । भवतीत्यत्राप्यापत्तेः । नोपसर्गार्थः । तथा सत्यप्रकृत्यर्थतया तत्राऽऽख्यातार्थानन्वयापत्तेः । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः । अनुगच्छतीत्यादावनुभवादिप्रत्ययापत्तेश्च । न विशिष्टार्थो गौरवात् । तथा च धातोरेव विद्यमानत्वादिवाचकस्यास्तु लक्षणा । उपसर्गस्तात्पर्यग्राहक इत्यस्तु । तथा तात्पर्यग्राहकत्वमेव द्योतकत्वमिति । एतच्चादिष्वपि तुल्यम् । चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम्, इवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वात्, इति स्वयं युक्त्यन्तरमाह—**उपास्येते इति** । अत्र ह्युपासना किमुपसर्गार्थो विशिष्टस्य धातुमात्रस्य वा । नाऽऽद्यः । तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्याऽऽसधातोरुपासनारूपफलवाचकत्वाभावादनापत्तेस्ततः कर्मणि लकारो न स्यात् । न द्वितीयो गौरवात् । तृतीये त्वागतं द्योतकत्वं तात्पर्यग्राहकत्वलाभादिति भावः । **दृश्यत** इत्यत्र कर्मणीति शेषः॥१॥(४१)

तच्चादिष्वपि तुल्यमित्याह—

तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः ।
विशेषणाद्ययोगोऽपि प्रादिवच्चादिके समः ॥ २ ॥ (४२)

अन्यत्र साक्षात्क्रियतेऽलं क्रियत उरी क्रियते शिव इत्यादौ । अत्रापि धातोस्तदर्थे कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवदेव द्योतकत्वममीषामपीत्यर्थः । यद्यपि कृधातोः सकर्मकत्वमस्त्येव तथाऽप्येष्वर्थेषु सकर्मकता न स्यात् । अन्यथा वायुर्वि+कुरुते सैन्धवा विकुर्वत इत्यत्रापि स्यादिति भावः । अथोपासना-

---

+ अकर्मकाच्चेतिविहितात्मनेपदानुपपत्तिरिति भावः ।

(निपातद्योतकत्वनिर्णयः)

साक्षात्कारादिर्निपातार्थोऽस्तु " साक्षात्प्रत्यक्षतुल्ययोः " इति कोशस्वरसात् । तदनुकूलो व्यापार एव धात्वर्थोऽस्तु स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं साधकमिति चेन्न । नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासंभवान्निपातार्थधात्वर्थयोरन्वयस्यैवासंभवादन्यथा तण्डुलः* पचतीत्यत्रापि कर्मतया तण्डुलानां धात्वर्थेऽन्वयापत्तेरिति । किं च प्रादीनां वाचकत्वे भूयान्प्रकर्षः कीदृशो निश्चय इतिवद्भूयान्प्र कीदृशो निरित्यपि स्यात् । अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इत्यत एव द्योतकता तेषां स्यादिति साधकान्तरमभिप्रेत्याऽऽह—**विशेषणेति** । शोभनः समुच्चयो द्रष्टव्य इतिवच्छोभनश्च द्रष्टव्य इत्यस्याऽऽपत्तेस्तुल्यसमाधेयत्वादिति भावः । अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासंभवः । अन्यथा राजा पुरुष इत्यत्राप्यापत्तेरित्यभिप्रेत्याऽऽह—**प्रादीति** । धवखदिरयोः समुच्चय इतिवद्धवस्य च खदिरस्य चेत्यैव स्यादिति भावः ॥ २ ॥ (४२)

ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विरुद्धविभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याऽऽह—

पदार्थः सदृशाऽन्वेति विभागेन कदाऽपि न ।
निपातेतरसंकोचे प्रमाणं किं विभावय ॥ ३ ॥ (४३)

सदृशा सदृशेन समानाधिकरणेनेति यावत् । **अन्वेति,** अभेदेनेति शेषः । **विभागेन,** असदृशेन, असमानाधिकरणेनेति यावत् । अयमर्थः—समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावो गौरवं च । अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः । अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः ॥ ३ ॥ (४३)

अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यादिति साधकान्तरमाह—

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्त्रसानिव ।
इत्यादावन्वयो न स्यात्सुपां च श्रवणं ततः ॥ ४ ॥(४४)

अत्रोस्रसदृशैः शरै रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः । =अयं चोस्रादिशब्दानां तत्सदृशपरत्व इवशब्दस्य च द्योतकत्वे संगच्छते । अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः । तथाहि—उस्रैरिति करणे तृतीया । न चोस्रोऽत्र करणमिवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन बोधयितुं शक्यमप्रकृत्यर्थत्वात् ।

---

* अत्र नामार्थः कर्मैव । = उक्तार्थान्वयबोधः ।

---

१ छ. °स्यस्य राजसंबन्धी पुरुष इत्यप्या° ।

इवशब्दस्य वाऽसत्त्वार्थकतया तदुत्तरं तृतीयाया असंभवात् । संभवे वा श्रवणप्रसङ्गात् । उस्रपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह—**सुपां चेति** । सुपां श्रवणं चेत्यर्थः । चकारादुस्रपदोत्तरतृतीयानन्वयः समुच्चीयते । इत्यादावित्यादिपदात् " वागर्थाविव संपृक्तौ पार्वतीपरमेश्वरौ वन्दे " इत्यत्र वागर्थयोर्वेदिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वय इव वागर्थस्य कर्मत्वबोधकासंभवश्च संगृह्यते । यदि च विशेषणविभक्तिरभेदार्थिका साधुत्वमात्रार्था वा तदाऽपीवशब्दस्य वाचकत्वेऽनन्वय एव । उस्रसदृशां शराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वययोगात् । बाधादभेदेनापि न सः । न ह्युस्राभिन्नसदृशाभिन्नः शर इत्यर्थो द्रष्टव्यः ॥ ४ ॥ (४४)

ननु त्वन्मतेऽब्राह्मण इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थप्राधान्याभावात् । उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो न स्यादित्यत आह—

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता ।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः ॥ ५ ॥ (४५)

नञ्समासादौ योत्तरपदप्रधानता सा द्योत्यमर्थमादायैव । तमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वमित्यर्थः । वस्तुतस्तु " अव्ययादाप्सुपः " [पा० सू० २-४-८२] इति ज्ञापकात्सुब्नुत्पत्तिः । " निपातस्यानर्थकस्य " इति वार्तिकाद्वा प्रातिपदिकत्वम् । कृत्तद्धितसमासाश्चेत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति बोध्यम् । तस्माद्युक्तं निपातानां द्योतकत्वम् ।

*उक्तं चाऽऽकृत्यधिकरणवार्तिके—

" +चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।
क्रियते =संशयोत्पत्तेर्नोपसर्गनिपातयोः ॥
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।
यदर्थद्योतकौ तौ तु वाचकः स विचार्यते " इति ॥

" उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ "

इति वृद्धोक्तावुपसर्गपदं निपातोपलक्षणम् । धातुपदं पदान्तरस्येति बोध्यम् ॥ ६ ॥ (४६)

नन्वन्वयव्यतिरेकाभ्यां निपातानां तदर्थवाचकत्वमेव युक्तं बोधकतारूपशक्तेरबा-

* मीमांसकसंमतिमाह । + नामाख्यातोपसर्गनिपाते । = जातिर्वा व्यक्तिर्वा व्यापार उत वा फलम् ।

१ छ. °दन्यः प्रतीय°।

धाच्च । किं चोक्तरीत्या पचतीत्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणाऽस्तु तात्पर्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेः पक्षान्तरमाह—

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः ॥ ६ ॥ (४६)

एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्न इति निपातातिरिक्तविषयं, समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वय इत्यपि तथेत्यगत्या कल्पनीयमिति भावः । **न त्विति** । नैयायिकोक्तं प्रादिचादिवैषम्यमित्यर्थः । यत्तु सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसंभवात् " निपातस्यानर्थकस्य " इति विधिवैयर्थ्यं, सर्वेषां द्योतकत्वे चानर्थकस्येति व्यर्थम्, तथा च केचिद्द्योतकाः केचिद्वाचका इत्यभ्युपेयमिति । तन्न । एवं हि चादयो द्योदकाः प्रादयो वाचका इति वैपरीत्यावारणात् । सर्वथाऽनर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय वार्तिकारम्भस्य कैयटादौ स्पष्टत्वाच्च । तस्य प्रत्याख्यातत्वाच्च । परेषामिति बहुवचनं मीमांसकसंग्रहाय । केवलवृक्षशब्दात्समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचको न द्योतकः । किं च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितं तदपि न युक्तमिति भावः । तथा हि—अन्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपयुक्तौ घटादिपदानामेव समुच्चिते लक्षणा तात्पर्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनाऽपि । अस्माकं लक्षणग्रहणदशायां बोधोत्तत्कार्यकारणभाव आवश्यकः । एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम् । अत एव " स वाचको विशेषाणां संभवाद्द्योतकोऽपि च " इतिवाक्यपदीयं संगच्छते । दर्शनान्तररीत्या वाचकत्वमेव, द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह—**मतमेवेति ॥ ६ ॥ (४६)**

पर्यवसितमुपसंहरन्नाह—

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाच्छक्तताया[1]स्त्ववच्छेदकमिष्यते ॥ ७ ॥ (४७)

(इति भट्टोजिदीक्षितविरचितकारिकासु निपातद्योतकत्वनिर्णयः ।)

परेषां यन्निपातत्वमसत्त्वार्थकत्वे सति चादिगणपठितत्वं शक्तिसंबन्धेन निपातपदवत्त्वं चोपाधिर्जातिर्वा **तदेवास्माकम**पि परं तु सामान्यधर्मे प्रमाणानां पक्षपाताच्छक्तता द्योतकता वा तदवच्छेदेनैव कल्प्येति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्यर्थः ।

---

१ ज. °क्षणाग्र° । २ ज. °धाभावात्त° ।

व्यापकत्वात्, सामान्यत्वात्। शक्तताया इत्युपलक्षणं द्योतकताया वेत्यपि द्रष्टव्यम् ॥ ७ ॥ (४७)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः समाप्तः।

(अथ भावप्रत्ययार्थनिर्णयः।)

भावप्रत्ययार्थमाह—

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम्।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम् ॥ १ ॥ (४८)

" कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यः " इति वार्तिकवचनमिति मीमांसकादीनां भ्रममपाकुर्वन्नाह—**टीकायामिति**। भर्तृहरिणा महाभाष्यटीकायामित्यर्थः। **त्वतलोरिति**। भावप्रत्ययमात्रोपलक्षणम्। अयमर्थः—समासादौ शक्तिः कल्प्यमाना राजादिसंबन्धविशिष्टे कल्प्यत इत्युक्तम्। तथा च तदुत्तरभावप्रत्ययः संबन्धं वदतीत्यर्थः। एतदपि भेदः संसर्ग उभयं वेत्युक्तेषु पक्षेषु भेदपक्षे न संभवतीत्यत आह—**मतभेदेति**। पक्षभेदेनेत्यर्थः। एवं च राजपुरुषत्वमौपगवत्वं पक्कृत्वमित्यादौ स्वस्वामिभावः। अपत्यापत्यवत्संबन्धः क्रियाकारकभावसंबन्ध इत्यन्वयबोधः। औपगवादावव्यभिचारिसंबन्धे त्वर्थान्तरवृत्तिस्तद्धित उदाहार्यः। दामोदरत्वं कृष्णसर्पत्वमित्यादौ जातिविशेषबोधादाह—**अन्यत्रेति**। रूढेरभिन्नरूपाद्व्यभिचरितसंबन्धेभ्यश्चान्यत्रेत्यर्थः। रूढिरुक्ता। द्वितीयं यथा **शुक्लत्वम्**। अत्र " तदस्यास्त्यस्मिन्" इति मतुपो " गुणवचनेभ्यो मतुपो लुगिष्टः " इति लुप्तत्वात्तद्धितान्तत्वेऽपि घटः शुक्ल इत्यभेदप्रत्ययाद्गुणस्यैव प्रकारत्वेन भानं जायते, तृतीये सतो भावः **सत्तेति**, अत्र जातावेव प्रत्यय इति दिक् ॥ १ ॥ (४८)

दण्डीत्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकता तद्धितस्येति वदन्तं मीमांसकंमन्यं प्रत्याह—

अत्रार्धजरतीयं स्यादर्शनान्तरगामिना(णा)म्।
सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु ॥ २ ॥ (४९)

अत्र, भावप्रत्ययविषये। तथा हि—दामोदरत्वं घटत्वमित्यादौ भावप्रत्ययस्य संबन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमित्यादिष्वपि तदभिधानं न स्यात्। प्रकृति-

---

१ ज. तथा।

(भावप्रत्ययार्थनिर्णयः)

जन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभावप्रत्ययेनाभिधीयते । अन्यथा घटत्व-मित्यत्र द्रव्यत्वादेर्दण्डित्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यतापत्तेः । न च तन्मते दण्डीत्यादिबोधे संबन्धः प्रकारः ।

यत्तु—

" यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः ।
तदा गत्यन्तराभावात्संबन्धो वाच्य आश्रितः "

इति, तन्न । इनादेः संबन्धवाचकत्वेनोपपत्तावग*त्यभावात् । प्रपञ्चितं चैतदादावेव वैयाकरणभूषणे । ननु तवापीदं वैषम्यं कथमित्यत आह–**सिद्धान्ते त्विति** । (+जायन्त इति वक्ष्यमाणशेषेणान्वितं, सिद्धान्ते प्रकृतिजन्यबोधप्रकारे त्वादयो जायन्त इत्यर्थः । स प्रकृतिजन्यबोधप्रकारः क इत्यत्र पक्षद्वयं स्थितमिति योजना) ॥ २ ॥ (४९)

तौ पक्षावाह—

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम् ।
धर्ममात्रं वाच्यमिति यद्वा शब्दपरादमी ॥
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते ॥ ३ ॥ (५०)

(इति भट्टोजिदीक्षितविरचितकारिकासु भावप्रत्ययार्थनिर्णयः ।)

प्रयोग उपाधिर्निमित्तं प्रकृत्यर्थप्रकारतया भासमानं धर्मं वाच्यतयाऽऽश्रित्य त्वादयो जायन्ते । प्रकृतिजन्यबोधप्रकारस्त्वाद्यर्थ इति यावत् । ननु घटत्वमित्यत्र प्रकारत्वात्तदुत्तरत्वप्रत्यये घटत्वत्वस्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह—**धर्म-मात्रमिति** । न त्वत्र लघुगुरुविचार इत्यभिप्रायः । तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव घटत्वत्वादिरूपत्वात् ।

" संबन्धिभेदात्सत्तैव विद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः " ॥

इति वाक्यपदीयात् । उक्तं च " तस्य भावस्त्वतलौ " [पा० सू० ५-१-११९] इति सूत्रे वार्तिककारैः—" यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ " इति । **यस्य गुणस्य** विशेषणतया भासमानस्य **भावादाश्रयत्वात्, द्रव्ये** विशेष्ये । **शब्दनिवेशः** शब्दप्रवृत्तिस्तस्मिन्वाच्ये त्वतलावित्यर्थः । तथा च रूपादि-

---

* संबन्धस्यैव भावत्वात् । + धनुश्चिह्नान्तर्गतग्रन्थश्छ. पुस्तके नास्ति ।

---

१ ङ. च. °र्दण्डीत्या° । २ ज. °त्यर्थे प्र° । ३ छ. °रा अमी । ४ ज. °त्यर्थे प्र° । ५ ङ. च. °त्र घटत्वनिमित्तप्र° ।

शब्देभ्यो जातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायाम्, घटादिशब्देभ्यो जातौ प्रत्ययः, रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात्। पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः। संसर्गप्रकारकबोधजनकत्वमिति मते च संसर्ग इति व्यवस्था सूपपादेति भावः। *तत्र जातिवाचकानां +व्यक्तय एव शक्यतावच्छेदिकास्तथा च घटत्वमित्यत्र घटवृत्तिरसाधारणो धर्म इति बोध इत्यादि द्रष्टव्यम्। पक्षान्तरमाह—**यद्वेति**। " यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति स तेषां भावः " इति वार्तिकोक्तो यद्वाशब्दस्तत्सूचनप्रयोजनकोऽपि। **भवन्ति** वाचकत्वेन प्रवर्तन्त इति भावाः शब्दाः **स्वेन** स्वरूपेणार्थेन भवन्ति प्रवर्तन्तेऽतः **स तेषां भावः** प्रवृत्तिनिमित्तमित्यर्थः। अयं भावः—अर्थवच्छब्दोऽपि द्रव्ये प्रकारः, हरिहरनलेक्ष्वाकुयुधिष्ठिरवसिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदिति शब्दप्रकारबोधस्य सर्वसिद्धत्वात्। ⊙अन्यथा वनौषधिवर्गादेर्नागरिकान्प्रत्यबोधकत्वापत्तेश्च। एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धः, न तु घटादिपदेष्विव तत्तज्जात्यादिरूपेण। तथा ∽चोभयमवच्छेदकम्। (∽एवमेव प्रसिद्धपदार्थेषु) यस्य यथा शक्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः। पदप्रकारकः शक्तिग्रहस्तु विशिष्य नापेक्षितः किं तु इदं पदं क्वचिच्छक्तं साधुपदत्वादित्यादिरूप एवापेक्ष्यत इति विशिष्यागृहीतशक्तिकेभ्यस्तथैव बोधस्तथा च शब्दोऽपि त्वप्रत्ययार्थ इति प्रपञ्चितं भूषणे ॥ ३ ॥ (९०)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
भावप्रत्ययार्थनिर्णयः।

(अथ देवताप्रत्ययार्थनिर्णयः।)

साऽस्य देवतेत्यत्र देवताविशिष्टं देयं प्रत्ययार्थः। ऐन्द्रं वैश्वदेवीत्यादाविन्द्रादेर्देवतात्वोपस्थापकान्तराभावात्तेन रूपेणोपस्थितये शक्तिकल्पनावश्यकत्वात्।

× अत एव—

" आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसांनिध्यात्तस्यैव विषयार्पणम् " इति,

" केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन्[२]।
नान्ययुक्ताग्निदैवत्यं प्रतिपादयितुं क्षमः "

---

* जात्यादिवाचकभावप्रत्ययेषु मध्ये। + भावप्रत्ययप्रकृत्यर्थरूपाः। ⊙ शब्दानां प्रकारताऽभाने। ∽धनश्चिह्नान्तर्गतं नास्ति ङ. छ. पुस्तकयोः। × देवतासंबन्धिनः प्रत्ययार्थत्वादेव।

---

१ च. °णे पक्त्वादि°। २ ङ. च. °तोऽग्रे स°।

(देवताप्रत्ययार्थनिर्णयः)

इति च मीमांसकैरप्युक्तमित्याशयेनाऽऽह—

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ।
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः ॥
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥ १ ॥ (५१)

एकदेशे देवतारूपे । तच्च विशेषणमभेदेनेत्याह—**अभेदश्चेति** । ननु देवतायाः प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य तत्राभेदेनाप्यन्वय इत्याशयेनाऽऽह—**देवतायामिति** । तथा च पदार्थैकदेशतैव नास्तीति भावः ॥ १ ॥ (५१)

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या । न च देवतात्वेन रूपेणोपस्थितये सा कल्प्यते प्रकृतेर्लक्षणयैव तथोपस्थितिसंभवात् । उपसर्गाणां द्योतकत्वनये 'प्रजयतीत्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याऽऽह—

प्रदेय एव वा शक्तिः प्रकृतेर्वाऽस्तु लक्षणा ।
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः ॥ २ ॥ (५२)

न चैन्द्रं दधीत्यादौ द्रव्यस्य पदान्तराल्लाभात्कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यत इति वाच्यम् । पदान्तराश्रवणेऽपि तत्प्रतीतेरैन्द्रं दधीति सामानाधिकरण्याच्च । *अन्यथाऽऽख्यातस्यापि कर्तृकर्मवाचित्वं न स्यात् । +मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु । द्रव्यं पदान्तराल्लभ्यत एवेति आख्यातस्य कर्तृवद्वाच्यत्वं माऽस्त्विति कुतो न शक्यते वक्तुमिति दिक् । देवतायां देवतात्वरूपेण निरूढेत्यनुपपत्तिज्ञानापूर्वकत्वमनादिप्रयोगावच्छिन्नत्वं वा तत्त्वमिति भावः ॥ २ ॥ (५२)

अनयैव रीत्याऽन्यत्राप्यवधेयमित्याह—

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता ।
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते ॥ ३ ॥ (५)

(इति भट्टोजिदीक्षितविरचितकारिकासु देवताप्रत्ययार्थनिर्णयः ।)

" तदस्यां प्रहरणमिति क्रीडायां णः " [पा० सू० ४-२-५७] इत्यत्र प्रहरणविशिष्टा क्रीडा प्रहरणक्रीडे क्रीडामात्रं चेत्यर्थः । आदिना " सोऽस्य निवासः " [पा० सू० ४-३-८९] " साऽस्मिन्पौर्णमासीति संज्ञायाम् " [पा० सू० ४-२-२१] " तदस्यास्त्यस्मिन्निति मतुप् " [पा० सू० ५-२-९४] इत्यादिकं संगृह्यते । वृत्तिमात्रेऽतिरिक्तशक्तेः " समर्थः पदविधिः " [पा० सू० २-१-१] इति सूत्राल्लाभादुक्तो विचारः शास्त्रान्तरीयैः सह तद्वीत्यैवोक्तः । आरोपितप्रकृतिप्रत्य-

---

* अस्मभिव्याहारे । + पूर्वं वैयाकरणान्प्रति दूषणम् ।

यार्थमादाय वा । वस्तुतो विशिष्टशक्त्यैवार्थोपस्थितेरित्याह—**वस्तुत इति ॥ ३ ॥ (५३)**

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे[1]
देवताप्रत्ययार्थनिर्णयः ॥

(अथाभेदैकत्वसंख्याया वृत्तौ भाननिर्णयः)

वृत्तिप्रसङ्गात्तत्राभेदैकत्वसंख्या प्रतीयत इति सिद्धान्तं दृष्टान्तेन प्रतिपादयति—

अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः ।
कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते ॥ १ ॥ (५४)

(इति भट्टोजिदीक्षितविरचितकारिकास्वभेदैकत्वसंख्याया वृत्तौ भाननिर्णयः ।)

संख्याविशेषाणामविभागेन सत्त्वमभेदैकत्वसंख्या ।

उक्तं च वाक्यपदीये—

" यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः " इति ॥

परित्यक्तविशेषं वा संख्यासामान्यं तत् ।

उक्तं च—

" भेदानां वा परित्यागात्संख्यात्मा[2] स तथाविधः ।
व्यापाराज्जातिभागस्य भेदापोहेन वर्तते ॥
अगृहीतविशेषेण यथा रूपेण रूपवान् ।
प्रख्यायते न शुक्लादिभेदापोहस्तु गम्यते " इति ॥

अस्या वृत्तौ समासादौ भानं न्यायसिद्धमिति शेषः । इति मतस्थितिर्वैयाकरणानाम् । अयं भावः—राजपुरुष इत्यादौ राज्ञे राज्ञो राज्ञां वाऽयं पुरुष इति जिज्ञासा जायते । विशेषजिज्ञासा[3] च सामान्यज्ञानपूर्विकेति सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी । अतस्तस्यां शक्तिरिति । तस्या एकत्वेन प्रतीतौ न्यायमाह—**कपिञ्जलेति** । बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति भावः । वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा । तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात्तत्तद्रूपेणैव वाँच्यता[4] स्यादिति ध्येयम् ॥ ॥ १ ॥ (५४)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारेऽभेदैकत्वसंख्याया वृत्तौ भाननिर्णयः समाप्तः ॥

---

१ च, ज. °रे यौगिकार्थ° । २ च. °ख्या स च त° । ३ छ. °सायां सामान्यरू° । ४ च. हेतुता ।

(उद्देश्यविधेययोः संख्याविवक्षानिर्णयः)

(अथोद्देश्यविधेययोः संख्याविवक्षानिर्णयः ।)

संख्याप्रसङ्गादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति—

लक्ष्यानुरोधात्संख्यायास्तन्त्रातन्त्रे मते यतः ।
पश्चैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ १ ॥ (५५)

*अहं संमार्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितमितिवन्नास्माकमुद्देश्यविशेषणाविवक्षानियमः । धातोरित्येकत्वस्य विवक्षितत्वात् ।

" उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
तदा सर्वैर्विशिष्येत द्वंद्वोत्पन्नसुबर्थवत् " ॥

इति शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च । "+आर्धधातुकस्येड्वलादेः " [पा० सू० ७-२-३५] इत्यत्रानुवाद्यार्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च । एवं पशुना यजेतेतिवद्विधेयविशेषणं विवक्षितमित्यपि न । " रदाभ्यां निष्ठातो नः पूर्वस्य च दः " [पा० सू० ८-२-४२] इत्यत्र नकारद्वयविधानानापत्तेः । तथा च भिन्न इत्यत्र नकारद्वयलाभो न स्यात् । " आद्गुणः " [पा० सू० ६-१-८७] इत्यादावेकत्वविवक्षयैवोपपत्तौ " एकः पूर्वपरयोः " [पा० सू० ६-१-८४] इत्यत्रैकग्रहणवैयर्थ्यापत्तेश्चेति भावः । शब्दार्थस्तु—संख्याया लक्ष्यानुरोधात्तन्त्रातन्त्रे यतो मते अतः पञ्चैकत्वाधिकरणोक्तहेतूनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति । आदिना ग्रहैकत्वसंग्रहः ॥ १ ॥ (५५)

ननु विधेयविशेषणविवक्षाऽऽवश्यकी अन्यथाऽनन्तनकाराद्यापत्तेर्भिन्नमित्यत्र नकारद्वयवदन्येषामप्यापत्तेः । एकः पूर्वपरयोरित्यत्रैकग्रहणं च स्थानिभेदादादेशभेदवारणायेत्यभिप्रेत्याऽऽह—

विधेये भेदकं तन्त्रमन्यतो नियमो न हि ।
ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ २ ॥ (५६)

भेदकं विशेषणं तन्त्रं विवक्षितं विधेयविशेषणं विवक्षितमित्यस्तु । तथाऽप्यन्यतः, अनुवाद्यस्य नियमो न हि । क्वचित्तन्त्रं क्वचिन्नेत्यर्थः । ग्रहैकत्वादौ यो हेतुर्वाक्यभेदादिस्तस्यात्राऽऽश्रयणमनाकरम् । एकत्वविशिष्टं धातुं वलादित्वविशिष्टमार्धधातुकं चोद्दिश्य प्रत्ययेऽागमादेर्विधिसंभवादिति भावः ॥ २ ॥ (५६)

---

* यज्ञपात्रम् । एकत्वविवक्षायां सर्वपात्राणां भावे वैगुण्यं स्यात् । + सर्वधातूपस्थित्याऽनिष्टं स्यादत आर्धधातुकस्येति ।

---

१ ज. °थौ सुध्युपास्य इत्यत्रानन्तयकारापत्तेः । भिन्न° ।

नन्वेवं भिन्न इत्यत्र नकारद्वयलाभो न स्यादित्यत आह—

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।
क्षतिर्नैवास्ति तत्रत्वे विधेये भेदकस्य तु ॥ ३ ॥ (५७)

(इति भट्टोजिदीक्षितविरचितकारिकासूद्देश्यविधेययोः संख्याविवक्षानिर्णयः ।)

चकारसूचितं निष्ठातस्य नः पूर्वस्य दस्य च न इति वाक्यभेदमादाय नकारद्वयलाभ इत्यर्थः ॥ ३ ॥ (५७)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसार उद्देश्यविधेययोः संख्याविवक्षानिर्णयः समाप्तः ॥

(अथ क्त्वाद्यर्थनिर्णयः ।)

क्त्वाप्रत्ययादेरर्थं निरूपयति—

अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः ।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ॥ १ ॥ (५८)

(इति भट्टोजिदीक्षितविरचितकारिकासु क्त्वाद्यर्थनिर्णयः ।)

तुमादयस्तुमुनादयः । प्रकृत्यर्थे भावे । आदिना क्त्वादेः संग्रहः । भाव इत्यत्र मानमाह—**अव्यय कृत इति** । " अव्ययकृतो भावे " इति वार्तिकादित्यर्थः । ननु " समानकर्तृकयोः पूर्वकाले " [पा० सू० ३-४-२१] इत्यादिसूत्राणां का *गतिस्तत्राऽऽह—**समानकर्तृकत्वादीति** । अयं भावः—भोक्तुं पचति भुक्त्वा व्रजतीत्यादावेकवाक्यता सर्वसिद्धा भोजनपाकक्रिययोर्विशेषणविशेष्यभावमन्तरेणानुपपन्ना । =अन्यथा भुङ्क्ते व्रजतीत्यादावप्येकवाक्यतापत्तेः । तथा च +तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो जन्यत्वं सामानाधिकरण्यं × पूर्वोत्तरभावो ÷व्याप्यत्वं चेत्यादिरनेक†विधः । तथा च भोक्तुं पचति भुक्त्वा तृप्त इत्यादौ भोजनजनिका पाकक्रिया भोजनजन्या तृप्तिरिति बोधः । ⊹अत एव जलपानानन्तर्यस्य तृप्तौ सत्त्वेऽपि पीत्वा तृप्त इति न प्रयोगः । सामानाधिकरण्यस्यापि संसर्गत्वेनार्थात्समानकर्तृकत्वमपि लब्धम् । भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभावः सामानाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजनक्रियेति बोधः । ⌒अधीत्य तिष्ठति मुखं व्यादाय स्वपितीत्यादौ

---

* भावस्यैव प्रतीतौ पूर्वकालस्य कथं प्रतीतिरिति विचारः । = विशेष्यविशेषणभावमन्तरेणाप्येकवाक्यत्वोपगमे । + क्रिययोः । × विशेषणक्रियोत्तरसमयवृत्तित्वम् । ÷ अविनाभावित्वम् । † संसर्ग इत्यर्थः । ⊹ जन्यत्वस्यापि संसर्गत्वाभ्युपगमादेव । ⌒ व्याप्यत्वस्य संसर्गतायां युक्तिं प्रदर्शयति—अधीत्येति ।

---

१ च. तृप्यते ।

(क्त्वाद्यर्थनिर्णयः)

चाध्ययनव्यादानयोरभावकालेऽप्रयोगाद्यदा यदाऽस्य स्थितिः स्वापश्च तदा तदाऽध्ययनं मुखव्यादानं चेति कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्याप्यत्वं सामानाधिकरण्यं च संसर्गः । एवं चान्यलभ्यत्वान्न सूत्रात्तेषां वाच्यतालाभ इति युक्तमव्ययकृतो भाव इति । एवं च प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनाम् । अत एव " समानकर्तृकयोः " [पा० सू० ३-४-२१] इति सूत्रे स्वशब्देनोपात्तत्वान्नेति +भाष्यप्रतीकमादाय पौर्वापर्यकाले द्योत्ये क्त्वादिर्विधीयते न तु विषय इति भाव इति कैयटः । यत्तु समानकर्तृकयोरिति सूत्रात्समानकर्तृकत्वं क्त्वावाच्यमन्यथौदनं पक्त्वाऽहं भोक्ष्य इत्यत्र मयेति तृतीयाप्रसङ्गाच्च । न चाऽऽख्यातेन कर्तुरभिधानान्न सेति वाच्यम् । भोजनक्रियाकर्तुरभिधानेऽपि पाकक्रियाकर्तुस्तदभावात् । अनभिहिते भवतीति पर्युदासाश्रयणात् । अत एव प्रासाद आस्त इत्यत्र प्रसादनक्रियाधिकरणस्याभिधानेऽप्यस्तिक्रियाधिकरणस्यानभिधानात्सप्तमीति भाष्ये स्पष्टम् । तस्मात्क्त्वाप्रत्ययस्य कर्तृवाचित्वमावश्यकमिति, तन्न, सूत्रात्तस्य वाच्यत्वालाभात् । समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वेत्येव तदर्थात् । अन्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात् । तृतीयापादनं त्वाख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभिधानात्प्रधानानुरोधेन गुणे कार्यप्रवृत्तेर्न संभवति ।

उक्तं च वाक्यपदीये—

" प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते" इति ॥

किं चान्यथा कर्मणोऽपि क्त्वार्थतापत्तिः पक्त्वौदनो मया भुज्यत इत्यत्र द्वितीयायाः प्रकारान्तरेणावारणात् , इत्यास्तां विस्तरः ॥ १ ॥ (९८)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
क्त्वाद्यर्थनिर्णयः समाप्तः ।

+ इह कस्मान्न भवति पूर्वं भुङ्क्ते पश्चाद्व्रजतीत्यत्र स्वशब्देनोपात्तत्वान्नेति भाष्यमित्यर्थः ।

---

१ ज. °भव्यापारत्वबो° । २ छ. यथा । ३ छ. तथा ।

(अथ स्फोटवादः ।)

सिद्धान्तनिष्कर्षमाह—

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति[1] मतस्थितिः ।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः[2] ॥ १ ॥ (५९)

यद्यपि वर्णस्फोटः पदस्फोटो वाक्यस्फोटोऽखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति *वाक्यग्रहणमनर्थकं +दुरर्थकं च तथाऽपि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वबोधनाय तदुपादानम् । एतदेव ध्वनयन्नाह—**अतिनिष्कर्षे** इति । **मतस्थितिर्वैयाकरणानां** महाभाष्यकारादीनाम् । तत्र क्रमेण सर्वांस्तान्निरूपयन्वर्णस्फोटं **प्रथममाह—साधुशब्द**·इति । =साधुशब्दान्तर्गता वाचका न वेति विप्रतिपत्तिः । विधिकोटिरन्येषां नेति वैयाकरणानां साधुशब्दे पचति राम इति प्रयुज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव **बोधका** वाचकास्तेषामेव[3] शक्तत्वस्य प्राग्व्यवस्थापितत्वान्न तु तैः **स्मृता** लादयः स्वादयश्चेत्यर्थः ॥ १ ॥ (५९)

यत्तु प्रयोगान्तर्गतास्तिबादयो न वाचकास्तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः । एधांचक्रे ब्रह्मेत्यादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासंभवाच्च । किंतु तैः स्मृता लकाराः स्वादयश्च वाचका लत्वस्य जातिरूपतया शक्तावच्छेदकत्वौचित्यात् । अव्यभिचाराच्च । आदेशानां ·भिन्नतया परस्परव्यभिचारित्वात्† । " लः कर्मणि " [पा० सू० ३-४-६९] इत्याद्यनुशासनानुगुण्याच्च । न ह्यादेशेष्वर्थबोधकमनुशासनमुपलभामह इत्याहुस्तान्स्वसाधकयुक्तिभिर्निराचष्टे—

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा ।
किं चाऽऽख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ॥
कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय ॥ २ ॥ (६०)

व्यवस्थानुरोधात्प्रयोगान्तर्गता एव वाचका न तु तत्स्मृता ÷इत्यर्थः । तथा हि—पचतीत्यादौ लकारमविदुषो बोधान्न तस्य वाचकत्वम् । न च तेषां तिङ्क्षु शक्तिभ्रमाद्बोधः । तस्य भ्रमत्वे मानाभावात् । (+प्रयोगांशानाम्) आदेशिनामपि तत्तद्वै×याकरणैः स्वेच्छया भिन्नभिन्नानामभ्युपगमात्कः शक्तैः[3] को नेति व्यवस्थानापत्तेश्च ।

---

* व्यावर्त्याऽलाभात् । + तदतिरिक्तानामसंग्रहश्चेत्याह । = साध्वन्तर्गतवर्णस्मारिता इत्यर्थः । † तत्रापि न तेषामनुगमः । ÷ तदपेक्षयाऽस्मिन्पक्षे बहु लाघवम् । + धनुश्चिह्नान्तर्गतं ङ. छ. ज. पुस्तकेषु नास्ति । × शाकटायनादिभिः । एवं च तेषामपि बहुत्वम् ।

---

१ च. °ति व्यवस्थि° । २ छ. °र्थः । ये तु प्र° । ३ च. शक्यः ।

(स्फोटवादः)

सर्वेषां शक्तत्वे गौरवं व्यभिचारश्चास्त्येवाऽऽदेशानां *प्रयोगान्तर्गततया नियतत्वाद्युक्तं तेषां शक्तत्वम् । तथा चाऽऽदेशिस्मरणकल्पना नेति लाघवम् । साधकान्तरमाह—व्यवहृतेरिति । व्यवहारस्तावच्छक्तिग्राहकेषु +मुख्यः । स च श्रूयमाणतिङादिष्वेवेति त एव वाचका इत्यर्थः । किं च—तद्धेतुन्यायत इति । लकारस्य बोधकत्वे भूल इत्यतोऽपि बोधः स्यात् । तादृशे बोधे पचतीति समभिव्याहारोऽपि कारणमिति चेत्तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः । †अन्यथा लकारस्य वाचकत्वं समभिव्याहारस्य कारणत्वं चेत्युभयं कल्प्यमिति गौरवं स्यात् । तथा च तादृशसमभिव्याहारः समभिव्याहृता वर्णा वेत्यत्र विनिगमकाभावात्प्रयोगान्तर्गता वर्णा वाचका इति सिध्यतीति भावः । अपि च लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यादित्याशयेनाऽऽह—किं चेति । आदेशानां वाचकत्वे तिङ्त्वेन भावनाया[1] मानत्वादिना कर्तरि शक्तिरित्युपपद्यते विभाग इति भावः । न च शानजादौ कृतिर्लकारार्थ आश्रयः शानजर्थ इत्यस्तु "कर्तरि कृत्" [पा० सू० ३-४-६७] इत्यनुशासनादिति शङ्क्यम् । स्थान्यर्थेन निराकाङ्क्षतया शानजादौ कर्तरीत्यस्याप्रवृत्तेरन्यथा घञादावपि प्रवर्तेत ॥ २ ॥ (६०)

देवदत्तः पचमान इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशङ्क्याऽऽह—

तरबाद्यन्ततिङ्क्त्वस्ति नामता कृत्स्ववत् स्फुटा ।
नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्यताम् ॥ ३ ॥ (६१)

पचतितरां मैत्रः पचतिकल्पं मैत्र इत्यादिषु नामार्थत्वाभेदान्वययोः संभव एवेति कर्तृवाचकता स्यादिति भावः । न च पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात्कर्तरि लक्षणा पचमान इत्यत्राप्यापत्तेरिति लः कर्मणीत्यत्रानुशासनं च लाघवाय कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम् ॥ ३ ॥ (६१)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
स्फोटवादे वर्णस्फोटनिरूपणं समाप्तम् ।

(अथ पदादिस्फोटनिरूपणम् ।)

अथाऽऽदेशा वाचकाश्चेत्पदस्फोटस्तत स्फुटः ॥ ४ ॥ (६२)

---

* तदपेक्षयाऽस्मिन्पक्षे बहुलाघवम् । + तत्त्वं च शक्तिग्राहकान्तरनिरपेक्षत्वम् । † समुदायस्य शक्तत्वानङ्गीकारे ।

---

[1] छ. सति । २ छ. °नायां शानजादिं° ।

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह—**अथेत्यादि** । **आदेशास्तिङ्विसर्गादयः** । अयं भावः—समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिध्यति । प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्प्रत्येकं वर्णानामर्थवत्त्वेन प्रातिपदिकत्वापत्तौ " नलोपः प्रातिपदिकान्तस्य " [पा० सू० ८-२-७] इत्यादिभिर्धनं वनमित्यादौ नलोपाद्यापत्तेश्च । *एतच्च चर-+मवर्ण एव वाचकत्वशक्तिः शक्ते-+व्यासज्यवृत्तित्वे मानाभावा=त्पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति वर्णस्फोटवादिनां मतान्तरदूषणायोक्तं रामोऽस्तीति वक्तव्ये रामित्यनन्तरं घटिकोत्तरमकारोच्चारणेऽर्थबोधापत्त्या तादृशानुपूर्व्या एव शक्तताव[1]च्छेदकत्वौचित्यादिति दिक् ॥४॥(६२)

सुप्तिङन्तं पदमिति परि$भाषितपदस्य वाचकत्वस्वीकर्तॄणां मतमाह—

घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता ॥
वस्नसावाविवेहापि संप्रमोहो हि दृश्यते ॥ ५ ॥ (६३)

घटेनेत्यादौ "घटे" इति प्रकृतिर्नेति प्रत्ययः। घट(ट्) इति प्रकृतिरेनेति प्रत्यय इति विभागस्य " सर्वे सर्वपदादेशाः " इति स्वीकारे विशिष्य प्रकृतिप्रत्ययय[2]र्ज्ञानासंभवान्न वाचकत्वमित्यर्थः । वैयाकरणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाऽऽह—**वस्नसाविति** । " बहुवचनस्य वस्नसौ " [पा० सू० ८-१-२१] इति समुदायस्याऽऽदेशविधानान्नात्र तद्विभागः संभवतीत्यर्थः ॥ ५ ॥ (६३)

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह—

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु ॥
अर्थे विशिष्य संबन्धाग्रहणं चेत्समं पदे ।
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत्तथा ॥ ६ ॥ (६४)

हरेऽव विष्णोऽवेत्यादौ पदयोः " एङः पदान्तादति " [पा० सू० ६-१-१०९] इत्येकादेशे सति न तद्विभागः सुज्ञानस्तथा च प्रत्येकपदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात्समुदायेऽप्यावश्यिका शक्तिः । एवं प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समुदायव्युत्पन्नत्वबोधात्तत्राप्यावश्यिकैव शक्तिरिति भावः । वस्तुतः पदैः पदार्थबोधवद्वाक्येन पदार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ । ‡ अन्यथा घटः कर्मत्वमानयनं कृति-

* तद्वाचकपुरःसरं समभिव्याहारहेतुत्वं चेत्यर्थः । + तदुच्चारणे तत्पूर्ववर्णानामसत्त्वादिति भावः । -+ समुदायवृत्तित्वे । = ननु तर्हि तन्मात्रश्रवणादर्थप्रतीतिः कुतो नेत्यत आह—पूर्वेति । $ पाणिन्यादिभिः । ‡ वाक्यशक्तेरनभ्युपगमे ।

१ ङ. छ. ज. 'त्पत्त्या बो' ।

(स्फोटवादः)

रित्यादौ *तादृशव्युत्पत्तिरहितस्यापि बोधप्रसङ्गः। +घटमानयेत्यत्रैव पदार्थानामुपस्थितौ सत्यपि तात्पर्यज्ञाने बोधा⌒भावाच्च। तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो †बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः। घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात्। अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वात्। युक्तं चैतद्विषयतासंबन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवेन हेतुत्वसिद्धेः। विवेचितं चैतद्दूषणे। ननु वाक्यार्थस्यापूर्वत्वात्कथं तत्र शक्तिग्रह इत्याशङ्क्याऽऽह—**अर्थ इति**। वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे विशिष्य शक्त्यग्रहणं चेत्तर्हि पदेऽपि समम्। पद एवान्वयांशे शक्तिरिति पक्षेऽपि तद्ग्रहासंभवस्तुल्य इत्यर्थः। यदि च पदशक्तिः पदार्थांशे ज्ञाताऽन्वयांशे चाज्ञातोपयुज्यत इति कुञ्जशक्तिवादस्तदा मम[1]ापि वाक्यशक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः। ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेऽपि तद्ग्रह इति चेत्तुल्यमित्याह—**लक्षणादिति**। लक्ष्यते तर्क्यतेऽनेनेति लक्षणं मनस्तस्मात्। अपिः पदपदोत्तरं बोध्यः, पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु वाक्येऽपीति शेषः। वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः। आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम् ॥ ६ ॥ (६४)

इयमेव मीमांसकानां वेदान्तैकदेशिनां च गतिरित्याह—

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः।
भाट्टास्तेऽपीत्थमेवाऽऽहुर्लक्षणाया ग्रहे गतिम् ॥ ७ ॥(६५)

भाट्टा इति तदनुयायिनां वाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणम्। स्पष्टमेतत्।

ननूक्तपक्षद्वयमनुपपन्नमुत्पत्तेरभिव्यक्तेर्वैकदाऽसंभवेन वर्णसमूहरूपपदज्ञानासंभवात्। तथा च सुतरां तत्समूहरूपवाक्यार्थज्ञानासंभव इति चेन्न। उत्तरवर्णप्रत्यक्षसमयेऽव्यवहितोत्तरत्वसंबन्धेनोपस्थितपूर्ववर्णवत्त्वं तथा तदुत्तरप्रत्यक्षकाल उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन्सुग्रहमिति तादृशानुपूर्वीघटितपदत्वस्येव वाक्यत्वस्यापि सुग्रहत्वात् ॥ ७ ॥ (६६)

इदानीमखण्डपक्षमाह—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥ ८ ॥ (६६)

---

* पदार्थसंसर्गबोधकत्वरूपवाक्यशक्तिज्ञानरहितस्य। + अत्र तादृशव्युत्पत्तिरहितस्येत्यनुषज्यते। ⌒किं पुनर्घटः कर्मत्वमित्यत्र वक्तव्यमिति शेषः। † समभिव्याहारनिष्ठबोधजनकज्ञानमपि।

---

१ ङ. 'माप्यन्वयांशे वा'। २ ङ. छ. ज. 'वाक्यज्ञा'।

पदे पचतीत्यादौ न वर्णाः, नातो वर्णसमूहः पदमिति शेषः । दृष्टान्तव्याजेनाऽऽह—**वर्णेष्विति** । एकारौकारलकारऋकारादिवर्णेष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः । क्वचिदित्येव पाठः । एवं वाक्येऽप्याह—**वाक्यादिति** । पदानामपि वाक्याद्विवेको भेदो नास्तीत्यर्थः । अयं भावः—वाक्यं पदं वाऽखण्डमेव न तु वर्णसमूहः । अनन्तवर्णकल्पने मानाभावात् । तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वाऽवच्छेदकं वैजात्यमादायैव* ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसंभवात् । स्पष्टं हि भामत्याम्—" तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते " इत्युक्तं देवताधिकरणे । न चैवं वायुसंयोग एव वाचकोऽपि किं न स्यादिति वाच्यम् । प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात् । तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं पदं तदेवेदं वाक्यं सोऽयं गकार इति प्रतीत्या च स्फोटोऽखण्डः सिध्यति । एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवच्छ्रूयमाणवर्णानामेव वाचकत्वमस्त्वित्यपास्तम् । ‡तेषां स्फोटातिरिक्तत्वाभावात् । यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः । समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसंभाव्यमेव । पूर्वपूर्ववर्णानुभवसंस्कारसहकारेणैकदा समूहालम्बनरूपसकलज्ञानसंभवस्तु सरो रसो जरा[3]जनदीदीनादिसाधारण इत्यतिप्रसङ्ग इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचक इति कैयटः । तत्तुच्छम् । पदज्ञानसंभवस्योपपादितत्वाद्वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पप्रासाच्च । ननु त्वन्मतेऽप्येष दोषः । तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पगणसंभवादिति चेत् । उच्यते । प्रत्येकमेव संयोगाभिव्यञ्जकाः परं तु केचिद्ह्रस्वत्वेन केचिद्दीर्घत्वेन केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैरत एव वर्णानां †तदतिरेकास्वीकारोऽप्युपपद्यते । एवं चाव्यवहितोत्तरत्वसंबन्धेन घटत्वं टकारे ×गृह्यते । एतादृशपदज्ञानकारणताया अविवादात् । परं त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यमत एव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादिर्नैयायिकवृद्धानां व्यवहारः । एवं च न कश्चिद्दोषः । ¶एतेन पर्यायस्थलेष्वेक एव स्फोटः, नाना वा । नाऽऽद्यः । घटपदे गृहीतशक्तिकस्य कलशपदाद्बोधप्रसङ्गात् । न च तत्पर्यायाभिव्यक्ते शक्तिग्रहस्तत्पर्यायश्रवणेऽर्थधीहेतुरिति वाच्यम् । एवं सति

---

* पदादिस्फोट आरोप्य । ‡ गत्वादीनाम् । + वर्णाद्यघटित इत्यर्थः । †स्फोटातिरेकत्वस्यासत्त्वात् । × अतो न रसात्सरभानम् । ¶ वर्णानुपूर्व्यवच्छिन्नस्फोटस्य वाचकत्वव्यवस्थापनेनेत्यर्थः ।

---

१ ङ. छ. भावः । २ ङ. छ. °दिवेर्ये । ३ च. ज. राजान° । ४ छ. °ल्पस्य सं° । ज. °ल्पग्रहण° ।

(स्फोटवादः)

प्रतिपर्यायं शक्तिग्रहावश्यंभावेन तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात् । तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च । अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात् । न द्वितीयः । अनन्तपदार्थानां तेषां शक्तिं चापेक्ष्य कल्पवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम् । *पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक् । शब्दकौस्तुभे तु +वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः, ÷अन्यथा †कपालातिरिक्तघटासिद्धिप्रसङ्गश्चेति प्रतिपादितम् ॥ ८ ॥ (६६)

नन्वेवं ×शास्त्राप्रामाण्यप्रसङ्गः पदस्याखण्डत्वात् । शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशङ्कां समाधत्ते—

पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ।
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ॥ ९ ॥ (६७)

उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः । अयं भावः—(=यथा भृगुवल्ल्यां "भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान् । स उवाचान्नम्" इति तस्योत्पत्त्यादिकं बुद्ध्वा पृष्टे प्राणमनोविज्ञानानन्दात्मकपञ्चकोशोपदेशोत्तरं "ब्रह्म पुच्छं प्रतिष्ठा" इति ज्ञेयं ब्रह्म प्रतिपादितम् । तच्च कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय, [⊙यथा वाऽऽनन्दवल्लीस्थपञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय) यथाऽऽनन्दवल्ल्यामन्नप्राणमनोविज्ञानानन्दमयात्मककोशपञ्चकव्युत्पादनं वास्तवपुच्छब्रह्मबोधनाय], एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति । ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसंभवान्न शास्त्रं तदुपाय इत्यत आह—उपाया इति । उपायस्योपायान्तरादूषकत्वात् । तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते मन्त्रजन्यमिवार्थस्मरणे दान्तजन्यमिव ब्रह्मज्ञाने, तस्य च ज्ञानस्य यज्ञादीनामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वं च ।

तदुक्तं वाक्यपदीये—

" तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।

---

*तत्तत्पर्यायरूपधर्मिभेदभिन्नाऽत्र शक्तिः। (शक्तावच्छेदकानुपूर्व्याः। +आनुपूर्वीयुक्तायाम्। ÷ प्रतीतेः पदार्थासाधकत्व इत्यर्थः। † कपाले घट इति प्रतीत्या भेदावगाहिन्या तत्सिद्धिः । × एवमुक्तस्फोटस्य वाचकत्व इत्यर्थः । = धनुश्चिह्नान्तर्गतग्रन्थो ङ. च. पुस्तकयोर्नास्ति । ⊙ एतच्चिह्नान्तर्गतो ग्रन्थोऽधिकोऽसंगतश्च क्वचित् ।

---

१ च. चिकीर्षितम् ।

इयं सा मोक्षमार्गाणामजिह्मा राजपद्धतिः ॥
अत्रातीतविपर्यासः केवलामनुपश्यति " इति ॥

न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः । तस्यालीकत्वासिद्धेर्वक्ष्यमाणत्वात् । एवं रेखागवयन्याय आदिना गृह्यते ॥ ९ ॥ (६७)

ननु स्फोटस्य वर्णजातीयानां च नित्यतया ककार उत्पन्न इति न स्यात् । वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तिश्चेत्यत आह—

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि ।
स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते ॥ १० ॥ (६८)

स्वीकारस्थलमाह—**स्वरदैर्घ्याद्यपीति** । आदिनोत्पत्तिविनाशादिसंग्रहः । उदात्तत्वादि न वर्णनिष्ठं तस्यैकत्वान्नित्यत्वाच्च । तच्च स एवायमिति प्रत्यभिज्ञानात् । न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयो व्यक्त्यंशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात् । न चोत्पत्तिप्रतीतिर्बाधिका । प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात् । अत एव वर्णमुच्चारयतीति प्रत्ययो न तूत्पादयतीति प्रत्ययो व्यवहारश्च । उच्चरितत्वं च तालवोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम् । किं च—व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेर्न साऽतिरिक्तवर्णसाधिका । परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम् । साक्षात्संबन्धांशे भ्रम इत्यवशिष्यते । तदपि सोऽयमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम् । परं तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते । न च वर्णस्थले ध्वनिसत्त्वे मानाभावः । तदुत्पादकशङ्खाद्यभावेन तदसंभवश्चेति वाच्यम् । ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्शनाज्जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात् । तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात्तवैव प्रतिबन्ध्यप्रतिबन्धकभावकल्पना निष्प्रमाणिकी(का) स्यादिति विपरीतं गौरवमेवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः । एवं चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि समान इति प्रतिबन्ध्येवोत्तरमिति भावः ॥ १० ॥ (६८)

इत्थं पञ्च व्यक्तिस्फोटाः । जातिस्फोटमाह—

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ।
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत् ॥ ११ ॥ (६९)

अयं भावः—वर्णास्तावदावश्यका उक्तरीत्या च सोऽयं गकार इतिवद्योऽयं गकार इति श्रुतः सोऽयं हकार इत्यपि स्यात् । स्फोटस्यैकत्वात् । गकारोऽयं न

---

१ ज. °र्यासं के° । २ ज. °त्वायव° । ३ ज. वर्णोत्पत्तिस्थ° । ४ ज. °शङ्खाद्य° ।

(स्फोटवादः)

हकार इत्यनापत्तेश्च। किं च स्फोटे गत्वाद्यभ्युपेयं न वा । आद्ये स एव गकारोऽस्तु वर्ण-नित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात् । तथा चातिरिक्तस्फोटकल्पन एव गौरव-म्, अन्त्ये गकारादिप्रतीतिविरोधः । वायुसंयोगवृत्तिध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेत् । न प्रतीतेर्विना बाधकं भ्रमत्वासंभवात् । अस्तु वा वायुसंयोग एव गकारोऽपि तस्यातीन्द्रियत्वं दोष इति चेद्धर्मवदुपपत्तेरिति कृतं स्फोटेन । तस्मात्स-न्त्येव वर्णाः परं तु न वाचका गौरवात् । आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्व-वद्वाचकत्वस्यापि युक्तत्वाच्च । इदं हरिपदमित्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात् । न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः, घटघटत्वादेरपि संयोगविशेषविशिष्टमृदा-कारादिभिश्चान्यथासिद्ध्यापत्तेः । तस्मात्सा जातिरेव वाचिका तादात्म्येन तदवच्छे-दिका चेति । ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वादर्थभेदबोधो न स्यादित्यत आह—**औपाधिको वेति** । वा त्वर्थे । उपाधिरानुपूर्वी सैव जातिविशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः । उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टा-न्तमाह—**वर्णानामिति** ॥ ११ ॥ (६९)

ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात्प्रत्येकादर्थबोधः स्यादित्यत आह—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृतौ ।
कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ १२ ॥ (७०)

अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता । योगार्थतया बोधि-केति यावत् । एतेन स्फोटस्य नित्यत्वात्सर्वदार्थबोधापत्तिरित्यपास्तम् । अयं भावः— यद्यपि वर्णस्फोटपक्षे कथितदोषोऽस्ति तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्य-वृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति **कैश्चिद्व्यक्तयो** ध्वनय एव ध्वनिवर्णयोर्भे-दाभावादीत्यभ्युपेयन्त इति शेषार्थः । उक्तं हि काव्यप्रकाशे—"बुधैर्वैयाकरणैः प्रधा-नीभूतस्फोटव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः" इति ॥ १२ ॥ (७०)

ननु का सा जातिस्तत्राऽऽह—

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ॥ १३ ॥ (७१)

प्रतिभावं प्रतिपदार्थं सत्यांशो जातिरसत्या व्यक्तयः । तत्तद्व्यक्तिविशिष्टब्रह्मैव जाति-रिति भावः । उक्तं च कैयटेन—" असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्य-मित्यर्थः " इति । "ब्रह्मतत्त्वमेव शब्दस्वरूपतया भाति" इति च । कथं तर्हि ब्रह्मद-

---

१ ङ. च. तदेव । २ ज. स्मृतः । ३ छ. °टरूपव्यङ्ग्यव्यं । ज. °टव्यङ्ग्यव्यं ।

र्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, आत्मैवेदं सर्वमिति श्रुतिवचनादिति कैयटः संगच्छताम् । अविद्याऽऽविद्यको धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम् ॥ १३ ॥ (७१)

तमेव सत्यांशं स्पष्टयति—

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥ १४ ॥ (७२)

(इति भट्टोजिदीक्षितविरचितकारिकासु पदादिस्फोटनिरूपणम् ।)

समाप्तः स्फोटवादः ।

इति भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिकाः समाप्ताः ।

अयं भावः—" नामरूपे व्याकरवाणि " इतिश्रुतिसिद्धा द्वयी सृष्टिस्तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम् । प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम् ।

उक्तं च वाक्यपदीये—

" शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम्" इति ॥

ब्रह्मैवेत्यनेन " अत्रायं पुरुषः स्वयंज्योतिः " " तमेव भान्तमनु भाति सर्वम् " " तस्य भासा सर्वमिदं विभाति " इतिश्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन्स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयति । निर्विघ्नप्रचयान्ते मङ्गलं स्तुतिनुतिरूपमाह—पूर्णात्मन इत्यादिना ॥

अशेषफलदातारमपि सर्वेश्वरं गुरुम् ।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥ १४ ॥ (७२)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे
स्फोटवादे पदादिस्फोटनिरूपणं समाप्तम् ॥

समाप्तश्च स्फोटवादः ।

इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टात्मजकौण्ड भट्टविरचितो वैयाकरणभूषणसारः समाप्तः ॥

---

१ ज. °म्भमाण° । २ ज. स्वप्र° । ३ छ. सूचयति ।

अथ भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिकाद्य-चरणप्रतीकानामकारादिवर्णानुक्रमसूची ।

प्रतीकानि ।	पृ०	का०
अ.		
अत एव गवित्याह	३०	२७
अथाऽऽदेशा वाचकाश्चे-	५७	६२
अत्रार्धजरतीयं स्यात्	४८	४९
अनेकव्यक्त्यभिव्यङ्ग्या	६३	७०
अभावो वाँ तदर्थोऽस्तु	४२	४०
अभेदैकत्वसंख्याया	५२	५४
अविग्रहा गतादिस्था	१६	१९
अव्ययकृत इत्युक्तेः	५४	५८
अषष्ठ्यर्थबहुव्रीहौ	३४	३३
असाधुरनुमानेन....	४०	३७
अस्त्यादावपि धर्म्यंशे	११	१२
आ.		
आख्यातशब्दे भागाभ्यां	१३	१४
आख्यातं तद्धितकृतो-	३७	३४
आश्रयोऽवधिरुद्देश्यः	२१	२४
इ.		
इत्थं निष्कृष्यमाणं य-	६४	७२
इन्द्रियाणां स्वविषये	३८	३६
उ.		
उत्सर्गोऽयं कर्मकर्तृ-	५	४
ए.		
एकं द्विकं त्रिकं चाथ	२७	२५
क.		
कल्पितानामुपाधित्वं	६२	६८
किं.		
किं कार्यं पचनीयं चे-	९	९
किं तूत्पादनमेवातः	७	६
कृ.		
कृत्तद्धितसमासेभ्यो	४८	४८
कृत्वोर्थाः क्त्वातुमुन्वत्स्यु-	१६	२०
क्री.		
क्रीडायां णस्तदस्यास्ती-	५१	५३
घ.		
घटेनेत्यादिषु न हि	५८	६३
च.		
चकारादिनिषेधोऽथ	३४	३२
ज.		
जहत्स्वार्थाजहत्स्वार्थे	३२	३०
त.		
तथाऽन्यत्र निपातेऽपि	४४	४२
तथा यस्य च भावेन	१५	१७
तरबाद्यन्ततिङ्क्ष्वस्ति	५७	६१
तस्मात्करोतिर्धातोः स्यात्	८	८
द्यो.		
द्योतकाः प्रादयो येन	४४	४१
धा.		
धात्वर्थत्वं क्रियात्वं चे-	११	११
न.		
नञ्समासे चापरस्य	४२	३९
नञ्समासे चापरस्य	४६	४५
नि.		
निपातत्वं परेषां यत्	४७	४७

प्रतीकानि ।	पृ०	का०
निपातानां वाचकत्व—	४७	४६
निर्वर्त्ये च विकार्ये च	७	७
प.		
पञ्चकोशादिवत्तस्मा—	६१	६७
पदार्थः सदृशाऽन्वेति	४५	४३
पदे न वर्णा विद्यन्ते	५९	६६
पर्यवस्यच्छाद्धबोधा—	३८	३५
प्र.		
प्रत्ययार्थस्यैकदेशे	५१	५१
प्रदेय एव वा शक्तिः	५१	५२
प्रयोगोपाधिमाश्रित्य	४९	५०
फ.		
फणिभाषितभाष्याब्धेः	१	१
फलव्यापारयोरेक—	१२	१३
फलव्यापारयोर्धातु·	२	२
फलव्यापारयोस्तत्र	५	३
भे.		
भेद्यभेदकसंबन्धो	१७	२१
य.		
यदि पक्षेऽपि वत्यर्थः	१५	१८
र.		
रदाभ्यां वाक्यभेदेन	५४	५७
ल.		
लक्ष्यानुरोधात्संख्याया—	५३	५५
व.		
वर्तमाने परोक्षे श्वो—	१८	२२
वा.		
वाक्यस्फोटोऽतिनिष्कर्षे	५६	५९

प्रतीकानि ।	पृ०	का०
वि.		
विधेये भेदकं तत्र—	५३	५६
व्य.		
व्यवस्थितेर्व्यवहृते-	५६	६०
व्या.		
व्यापारो भावना सैवो—	६	५
श.		
शक्यत्व इव शक्तत्वे	६२	६९
शब्दोऽपि यदि भेदेन	२९	२६
शरैरुस्रैरिवोदीच्या—	४६	४४
स.		
सत्यासत्यौ तु यौ भागौ	६३	७१
समासस्तु चतुर्धेति	३१	२९
समासे खलु भिन्नैव	३३	३१
सर्वत्रैव हि वाक्यार्थो	५९	६५
सर्वनामाव्ययादीनां	११	१०
सा.		
साध्यत्वेन क्रिया तत्र	१३	१५
सु.		
सुपां सुपा तिङा नाम्ना	३०	२८
सं.		
संबन्धशब्दे संबन्धो	४२	३८
संबोधनान्तं कृत्वोर्थाः	१४	१६
ह.		
हरेऽवेत्यादि दृष्ट्वा च	५८	६४
ह्यो.		
ह्योभूते प्रेरणादौ च	१९	२३

इति भट्टोजिदीक्षितविरचितवैयाकरणसिद्धान्तकारिकाद्य-चरणप्रतीकानामकारादिवर्णानुक्रमसूची समाप्ता ।